प्रकाशकस्य-निवेदनम् ।

ॐ श्रीगुरवे नमः ।

"यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छित-फलं त्रैलोक्य-नाथो हरिः ॥"

हृषीकेशस्थ-शिवानन्दाश्रमनिवासिना भगवता आचार्येण श्रीमता स्वामिना पूर्णानन्देन साधकानां हितार्थाय काले काले विभिन्न-स्थानतः प्रेषितानां धर्मोपदेश-पूर्णानां लेखानां संग्रहेण 'वेद-वार्ता'-समाख्याता त्रयो ग्रन्था वङ्गभाषायां संमुद्र्य प्रकाशिताः सन्ति । तत्-कृतः 'Yoga and Perfection' इत्यभिधान आङ्गल-भाषामयोऽपरोऽपि ग्रन्थः प्रकाशितोऽस्ति । साम्प्रतं तेनैव महात्मना प्रायेण द्विसहस्रसंख्यै रनुष्टुप्श्लोकै र्ग्रथितः "पूर्णज्योति" र्नाम "महाग्रन्थः" सुखबोध्य-संस्कृत-भाषया निरमायि । अयं तु विधातु र्विश्व-रूपस्य इच्छा-प्रभावत स्वस्मात् ज्योतिर्मयाद्, देवात् ज्योती रूपेण निर्गतः—इत्युक्तं ग्रन्थ-गर्भे ग्रन्थ-परिचय-प्रदान प्रसङ्गेन । वर्ण-धर्माश्रम-निर्विशेषेण सर्वेषां नर-नारीणां मङ्गल्य-मार्गान् स्वकीय-रश्मिभि रुद्भावयन्, धर्म-राज्यस्य निगूढ-रह-

रहस्यानि प्रदर्शयन्, साध्य साधन तत्त्वानि सुस्पष्टं विनिर्दिशन्, बोध पूर्णज्योतिः प्रभावेण साधकानां मोहान्धतामसं दूरीकुर्वन् विश्व मङ्गलैक प्रयोजनं सार्थक नामाऽयं शास्त्र ग्रन्थो— विश्वमूर्ति गुरुमोदनार्थ दीपकम्ब —सत्यमिव इव विराजते। "ॐ सुप्रकाशो महादीपः सर्वत्र तिमिरापहः। स बाह्याभ्यन्तर ज्योतिः ॥" अनुपम गुरो दीपः।"—अत्र ह्यस्मिन् चतुरङ्ग साधनायाः— कल्याणाय निर्विशेषेण सर्व प्राणि पावनीय कार्याणि निरूपणानि। सर्वोऽपि पाठकगणानामपि केवलं पठनेनैव भूयान् उपकारो भविष्यति।

ग्रन्थोऽयं चतुरङ्ग तं शास्त्रं, यस्मिन् च तु चतुष्टय सन्ति— पूर्वाङ्ग मध्याङ्ग परराङ्ग साधाङ्ग इति। पूर्वाङ्गे ब्रह्मचर्य जीवन, मध्याङ्गे गार्हस्थ्य जीवनम्, परराङ्गे योगि जीवन साधाङ्गे च सिद्ध जीवन प्राधान्येन वर्णितं अस्ति। प्रथम जीवनं यथा ब्रह्मचर्य, यथा अन्य जीवन साधनोपयोगि भवेत्। यस्मिं तथा के वर्णं कर्हि, तदा कामं न योगमयं। पूर्वार्धे योग कार्यं क्रियते यो तथा भवति, तदा परिणामे न भवाम सत्वस्था पूर्णे स्थिति मन्यतामि।

पूर्वाङ्गे ब्रह्मचर्य-चतुष्टयं मनोयोग सहित अस्ति। यथा ब्रह्मचर्यं, विद्याभ्यास, देशाः पर्यटन, दीक्षा-माहात्म्य वर्णन-पूर्वक दीक्षा-ग्रहण क्रियादीन्यपि वर्णितानि।

मध्याङ्गे—विविध नैमित्तिक कर्माणि, तदनुसारेण यतो

प्रकाशकस्य निवेदनम् ।

पाठनं, पौष्य प्रतिपालनं, विप्र-सेवा, इष्ट-देवार्चनं, देश-दर्शनं, अध्ययनाद्यनुष्ठान-समन्वित-दिनचर्या, तीर्थ-सज्जन-सेवा, अधिकारानुसारतो योगाभ्यास इत्यादीनि कथ्यन्ते ।

अपराह्ने—चक्राणां वर्णनं, कुण्डली-बोधनं, चक्रे चक्रे अनुभूतयः, बहुविधाः साधन-पद्धतयश्च प्रदर्श्यन्ते ।

सायाह्ने—सिद्ध-जीवनं तथा सिद्ध-कर्तव्यानि निरूप्यन्ते । योगिनः स्थिर-चित्ताः, लब्ध-ब्रह्मानुभूतिं मुमुक्षुः श्रीगुरोः शरणं शरणं कृत्वा विरजां दीक्षां लभते । ततश्च शिव-जीवैक्यरूपा सम्विदुत्-पद्यते । ज्ञान-योगाभ्यासतोऽविच्छिन्न-तपश्चरणात् च काले 'धर्ममेघ समाधिना' ब्रह्म-प्रकृति-जीवानां याथार्थ्य-ज्ञानं लभते । अभ्यासेन वशीकृत-समाधिः स मायातीतः परात्पर एव भवति । एषाऽवस्था स्वाभाविकी भवति । स च यत्र क्षीणं 'सदा भाव' लब्ध्वा 'ब्रह्मैव भवति' । एतत् सर्वमपि सायाह्ने सविस्तरं वर्णितम् ।

ग्रन्थेऽस्मिन् 'कृष्णः' 'रामः' 'शिवः' 'दुर्गा' 'ब्रह्म' इत्यादीनि बहून्येव नामानि उक्तानि । तानि सर्वाण्येव अद्वितीय-परमेश्वरस्य वाचकानि, न तु देवता विशेषाणाम् ।

ग्रन्थस्य भाषा सरला, सुमधुरा, सुबोधा च । तथापि अपेक्षाकृत-दुर्बोधांशे टीकाऽपि संयोजिताऽस्ति । इयं समधिक-जिज्ञासूनां महते उपकाराय भविष्यति । तथापि बहु भाव-मयानां श्लोकानां समस्तार्थाः क्षुद्र-टीका-मुखेन न व्यक्तीभवन्ति । भावुकानां तथा तत्त्वानु-

प्रकाशकस्य निवेदनम्।

तृतीयां टीकातिरिक्तान्यपि बहूनि ज्ञातव्यानि ग्रन्थे विद्यन्ते।

परिशेषे प्रार्थयामः—अस्य ग्रन्थस्य सेवकाः स्वान्त-निहित-भक्त्यनुभावेन···शिवं ज्ञात्वा···शिवं भजन्तु ; प्रार्थयामः—

"सर्वेषां च शिवं भूयात्, पूर्णानन्दः सदाऽस्तु वः।
शिवस्यैव प्रसादेन शक्तिपातानुभावतः॥"

ओम्।

सूची-पत्रम् ॥

(संख्या श्लोकाङ्क-सूचिका ।)

पूर्वाङ्कः ॥

सूचीपत्रम्।

पूर्ण-ज्योतिः।

पञ्चमोल्लासः।

षष्ठोल्लासः।

सप्तमोल्लासः।

षष्ठोल्लासः।

सप्तमोल्लासः।

दशमोल्लासः।

एकादशोल्लासः।

द्वादशोल्लासः।

द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः ।

चतुर्दशोऽध्यायः ।

अपराङ्गः ।

प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

तृतीयोल्लासः।

चतुर्थोल्लासः।

पञ्चमोल्लासः।

षष्ठोल्लासः।

सप्तमोल्लासः ।

अष्टमोल्लासः ।

नवमोल्लासः ।

दशमोल्लासः ।

सूचीपत्रम् ।

१४ अन्य मीघो—पूर्णध्यानेनैव मन विनाम, सर्व भेद निराय १५-२२ ।

पञ्चोल्लास ।

जगतः भ्रान्तिमयत्वम्—सर्वेषां ब्रह्मरूपत्वम् १-२३ आत्म चिन्तनम्: २४-२८ ।

सप्तमोल्लास ।

जगन्मिथ्यात्व निर्णय: १-१४ ज्ञानादेव मुक्ति —ज्ञानेन १५-१८ ब्रह्मध्यानम्—"ध्यानं निर्विषयं मन" १८-२ ध्यान-फलम्: २५ ।

अष्टमोल्लास ।

जगति सत्यबुद्धि-त्यागादेशनम्—ब्रह्मभावनया विषय विषयत्व-परिहारोपदेश: १-६ सत्-चित्-आनन्द-नाम-रूपम्-रूपात्मा: चित्त-समुद्धरणोपदेश ७-१६ आत्म ध्यानम् १७-२३ ।

नवमोल्लास ।

सर्वेषां ब्रह्मत्व-निर्णय:...१-१३ ध्यान-योगोपदेश १४-२ परात्म-दर्शन-फलम्—मोक्ष: २६-२८ ।

दशमोल्लास: ।

जीवत्वस्य इन्द्रजालवत् मिथ्यामयत्वम् १-४ देहयुक्त जीवत्वम्—देहमुक्ता शिवत्वम्: ५-११ चित्तस्य चिज्जडत्वम्

एकादशोल्लास: ।

द्वादशोल्लास: ।

त्रयोदशोल्लास: ।

चतुर्दशोल्लास: ।

पञ्चदशोल्लास: ।

षोडशोल्लास: ।

सप्तदशोल्लासः ।

अष्टादशोल्लासः ।

एकोनविंशोल्लासः ।



पूर्ण-ज्योतिः ॥

पूर्वाङ्कः ।

प्रथमोल्लासः ।

श्रीगुरुं परमाद्वैतं स्वतन्त्रं परमं-शिवम् ।
अखण्डं सच्चिदानन्दं पराकाशं परेश्वरम् ॥ १ ॥
सर्वगं सर्व-कर्तारं सर्वं सर्वात्मव्यापकम् ।
सर्वावलम्बनं शान्तं ब्रह्म पूर्णं नमाम्यहम् ॥ २ ॥

श्रीः—[शोभा । विभूतिः । इति मेदिनी । अधिकारः । प्रभा । कीर्तिः । इति धरणिः । सिद्धिः । इति शब्द-रत्नावली ।] "देवं गुरुं गुरु-स्थानं क्षेत्रं क्षेत्राधिदेवताम् । सिद्धं सिद्धाधिकाराश्च 'श्री'-पूर्वं समुदीरयेत् ।"

गुरुः—[गॄ + कु] गिरति अज्ञानं यः सः ।

स्वतन्त्रः—स्वाधीनः । स्वच्छन्दः । निरर्गलः । अनन्यापेक्षः । "अस्वतन्त्राः प्रजाः सर्वाः स्वतन्त्रः पृथिवी-पतिः ।" इति नारदः । "अन्य-निरपेक्षता एव परमार्थतः आनन्दः, ऐश्वर्यं

स्वातन्त्र्यं, चैतन्यम् [illegible] न [illegible] लक्षणम् आत्मन [illegible] इति [illegible] र्मर्शि-न्याम् ॥

आत्मा— आ + अत् (सातत्य गमने [illegible]) + मन् (कर्तरि [illegible]) "नाना-भावैः स्वमात्मानं [illegible] स्वभावः। [illegible] चैतन्यम्। "चैतन्यमात्मा।" इति शिवसूत्रे। [illegible] रूपं सिद्धं ज्ञान क्रियात्मकम् [illegible] वार्यते॥" इति शिवसूत्र-वार्तिके [illegible] शितस्य) कस्यापि सत्ताभावात्, चिति-क्रिया [illegible] (सर्वत्र अस्ति इत्यर्थः) इति, चेतयते इति चेतन [illegible] ज्ञान-क्रिया-स्वतन्त्रः, तस्य भाव चैतन्यं सर्व-ज्ञान-क्रिया सम्बन्धमय परिपूर्णं स्वातन्त्र्यम् उच्यते। तदेतत् चैतन्यम् (स्वातन्त्र्यम्) एव आत्मा स्वभावः; विशेषाचोदनात् (अस्यैव आत्मा इति विशेषो न चोदितः, अतः विश्वस्य इति कथ्यते।। भावाभाव-रूपस्य विश्वस्य जगतः। न हि अचेत्यमानः (अप्रकाश्यमान) कोऽपि कस्यापि कदाचिदपि स्वभावो भवति।' इति शिवसूत्र-विमर्शिन्याम् ॥

परात्मा—परमात्मा। "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।" इति श्रीभागवतम् ॥

सर्वगः—सर्व-व्यापी । आत्मा । इति शब्दमाला ।

सर्व-कर्ता—सर्व-स्रष्टा । सर्वेषां प्रभुः । सर्वः—विश्व-रूपः ।

सर्वावभासकः—सर्व-प्रकाशकः । "तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाति ।" इति काठके ।

अचलमव्ययम्—आश्रयः ।

ब्रह्म—[बृंह (वृद्धौ, दीप्तौ) + मन्] "यल्लाभा नापरो लाभो यत्-सुखा नापरं सुखम् । यज्-ज्ञाना नापरं ज्ञानं तद् ब्रह्मेत्यवधारयेत् ॥ यद् दृष्ट्वा नापरं दृश्यं यद् भूत्वा न पुनर्भवः । यज्-ज्ञात्वा नापरं ज्ञेयं तद् ब्रह्मेत्यवधारयेत् ॥" इति आत्मबोधः । "सत्यम्, आनन्दम्, अद्वयम्, अमृतम्, एकरूपं, वाङ्मनसोऽगोचरं, सर्वगं, सर्वातीतं, चिदेकरसं, देशकालापरिच्छिन्नम्, अपादमपि शीघ्रगम्, अपाणि च सर्व-ग्रहम्, अचक्षुरपि सर्व-द्रष्टृ, अश्रोत्रमपि सर्व-श्रोतृ, अचिन्त्यमपि सर्वज्ञं, सर्व-नियन्तृ, सर्व-शक्ति, सर्वेषां सृष्टि-स्थिति-लय-कर्तृ किमपि वस्तु ब्रह्म—इति वेदा वदन्ति ।"

पूर्णः—[पूर् + क्त] सर्व-परिच्छेदातीतः । सम्यक्-व्याप्तः ।

विधातुर्विश्व-रूपस्य तस्येच्छायाः प्रभावतः ।
तस्मा ज्ज्योतिर्मयाद् देवा ज्ज्योती-रूपेण निर्गतः ॥३॥
'पूर्ण-ज्योति'संज्ञापन्न सामान्य-रूपतां गतः ।
तद्-विश्वमूर्ति-पूजायाम् अस्तु दीपः शिवान्वितः ॥४॥

[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] प्रद्योतनं। [illegible] [illegible] [illegible]

[illegible] [illegible] [illegible] [illegible] [illegible]
प्रतिभासन [illegible] [illegible] [illegible] [illegible]
इति याग आश्रित ।

ज्योतिर्मयः—[illegible] ज्योतिः । [illegible] [illegible] ज्योतिः ।
"ज्योतिषामपि तज्ज्योति [illegible] [illegible] [illegible] इति
गीतायाम् ॥

देवः—[दिव् (द्युतौ) । [illegible] [illegible] [illegible]

पद्मः—पद्म् + घ] पद्मनाभ । पद्मना [illegible] [illegible]
सर्व-निर्मिति । [illegible] [illegible] [illegible] ।

महापद्मः—महान् पद्मः । [illegible] [illegible] [illegible] ।

तयाम-शुद्धतां गतः—परमेश्वरस्य [illegible] शुद्धतां प्राप्त

दीपः—[दीप् (दीप्तौ) + घ] "ॐ [illegible] [illegible]
सर्वतः तिमिरापहः । स बाह्याभ्यन्तरज्योतिः दीपोऽयं प्रति-
गृह्यताम् ॥" "ॐ अग्नि-र्ज्योति रवि-र्ज्योति चन्द्र ज्योति-
स्तथैव च । ज्योतिषां मुत्तमो दुर्गे दीपोऽयं प्रतिगृह्यताम्
"दीपेन लोकान् जयति दीपः तेजोमयः स्मृतः । चतुर्वर्ग-
प्रदो दीपः तस्माद् दीपं यजेत् प्रिये ॥"

बलम्—सामर्थ्यम्॥ आत्म-श्रद्धायाम् अस्य सारम्भ, चेष्टायां बुद्धिः आत्म-शक्तौ विश्वासे स्थितिः॥ 'नायमात्मा बल-हीनेन लभ्यः।" इति मुण्डके॥ राति—ददाति।

मोक्षः—मुक्तिः। अपवर्गः। अमृतम्। निःश्रेयसम्। निर्वाणम्। कैवल्यम्॥ आत्यन्तिक-दुःख-निवृत्तिः। इति नैयायिकाः॥ नित्य-सुखावाप्तिः। इति वेदान्तिकाः॥ शरीरेन्द्रियाभ्याम् आत्मनो मुक्तत्वं मुक्तिः। इति भरतः॥ ['सायाङ्क'स्य अष्टादशोल्लासो द्रष्टव्यः।]

भक्ति-हीनाः—"भक्त्यैवाराध्यते विष्णु नान्यत् तत्तोष-कारणम्॥ न दाने विविधै र्दत्तै र्न पुष्पै र्नानुलेपनैः। तोषमेति महात्मासौ यथा भक्त्या जनार्दन॥" इति गारुडे॥

लेशः—कणा॥ कृपा—अनुग्रहेच्छा। प्रत्युपकारानपेक्षया पर-दुःख-प्रहरणेच्छा।

भक्त्यैक-सम्बला ये च शङ्करैक-निकेतनाः।
भुञ्जते ते महाभागा भव-भङ्ग-करीं कृपाम्॥७॥

भवः—[भू+अ] जन्म। संसारः। जगत्। The course of worldly life. Mundane existence. Succession of births. ['भव-लीला।' 'भव-बन्धनम्।' 'भव-समुद्रः।' 'भवारण्यम्।' 'भव-सिन्धुः।' भव-तारिणी।']

सैव भक्तिः महेशे या चानन्या ममता शुभा।
कुतो भक्तिः स्वैराचारे तृष्णा-दुर्भावना-मये॥८॥

अनन्या—अन्यैः सह सम्बन्ध-रहिता। अभिन्ना। भेद-विरहिता।

यथा—निपुणा। "ॐ तत् तु विषय-त्यागात् सङ्ग-त्यागात्।" इति नारद-भक्ति-सूत्रे॥

विश्वं मायामयं ज्ञात्वा येन सर्वं विना-कृतम्।
त्यक्त-सङ्गः स वैरागी लभते भक्तिमुत्तमाम्॥९॥

विश्वम्—[विश् (प्रवेशे)+व (कर्मणि, कर्त्तरि वा)] जगत्। सकलम्॥ माया—'मायाङ्क'स्य समदशोल्लासो द्रष्टव्यः।

विना-कृतम्—त्यक्तम्॥ वैरागी—विषयेच्छा-रहितः। वैराग्य-युक्तः।

तत्त्व-ज्ञाने समुत्पन्ने वैराग्यं जायते नृणाम्।
'ब्रह्म सर्वम्'-इति ज्ञानं तत्त्व ज्ञानं सुनिश्चितम्॥१०॥

तत्त्व-ज्ञानम्—चतुर्विंशति-तत्त्वानां तथा जीवात्म-परमात्मनो स्वरूप-ज्ञानम्—याथार्थ्य-ज्ञानम्। तदेव 'ब्रह्म सर्वम्'-इति ज्ञानम्। "न विना परमात्मानं किञ्चिज्जगति विद्यते। विश्व-रूपं तमेवेद इति ज्ञात्वा न मुह्यति।" इति गारुडे। "वासुदेवः सर्वमिति।" इति गीतायाम्।

वैराग्यम्—विषय-तुच्छ-धीः।

ज्ञानं प्रजायते नि -चित्त-सरोवरे।
शुद्ध-पूर्णे सुगम्भीरे प्रशान्ते निर्मले स्थिरे॥११॥

चित्त-शुद्धि र्भवेत् सत्यं निष्कामेन स्व-कर्मणा ।
संयमेन सदाचार श्चित्त-शुद्धि-करः परः ॥१२॥

सुकृतेन स्व-धर्मेण प्रार्च्य देवं महेश्वरम् ।
याति ब्रह्म-पदं नित्यम् अव्ययं बुद्धिमान् पुमान् ॥१३॥

सुकृतेन—सुविहितेन ॥ स्वधर्मः—निज-धर्मः । स्वस्य कर्तव्य कर्म । One's own duty.

अन्ये जडत्व मापन्ना मुग्ध-चित्ता नरोऽलसाः ।
निमज्जन्ति भवे घोरे दुःख-नक्र-समाकुले ॥१४॥

नरः—मानवाः ॥ घोरः—दारुणः । भयङ्करः । सङ्कटमयः ।
नक्रः—कुम्भीरः ।

अतो वै विधिव न्नित्यं कार्यं कर्म समाचरेत् ।
अवैधानि निषिद्धानि त्यक्त्वा कर्माण्यशेषतः ॥१५॥

पादौ संशोधयेद् देहान् संयमामल-वह्निना ।
शुभेच्छेन्धन-योगेन ज्वलितेन च जीवता ॥१६॥

देहः—[स्थूल-सूक्ष्म-कारण-भेदात् त्रिविधः ।] शरीरम् ।
संयमः—[सं+यम् (निवृत्तौ+घ] नियमः । बन्धनम् व्रत-पालनम् । इन्द्रिय-दमनम् । इन्द्रिय-निग्रहः । ('अष्टाङ्ग'ए चतीयोऽङ्गमो द्रष्टव्यः ।)

संयमोपाय-शिक्षार्थं शुश्रूषा-वर्धनाय च ।
षडङ्गं शिवदं-शास्त्रं वेदितं श्रद्धयान्वितः ॥१०॥

श्रद्धा—श्रद्धायाः (१) शान्ति—विश्रामः ; (२) पीवरं—प्रीतिः, अनुरागः, (३) प्रौढत्वं—निर्भरता ; (४) दृढत्वं—स्थानम् ।

द्वितीयोल्लासः ।

सतां-सङ्गः शुभं-शास्त्रं—नीरोगं नयन-द्वयम् ।
तद्द्वयेन विहीनो यः स यथान्धः सुनिश्चितम् ॥१॥
ध्वान्ताच्छन्ने भवारण्ये भ्रमत्येव विमार्गगः ।
काम-कर्म-लता-बद्धः काल-व्यालेन हिंसितः ॥२॥

ध्वान्तम्—अन्धकारः ।
व्यालः—सर्पः । श्वापदः । व्याघ्रः । दुष्ट-गजः ।

कोऽयमत्र न यो लोके महामाया-विमोहितः ।
कोऽयमत्रास्ति मोहेन यस्य नापहृतं मनः ॥३॥

मोदकेन यथा बाला भवन्त्येव प्रवञ्चिताः ।
तथा कामेन सर्वे च भवन्त्येव प्रतारिताः ॥४॥

[illegible]

[illegible]

[illegible]

[illegible]
सज्जनं तं निर्दिशन्ति [illegible]
निर्दिशन्ति [illegible]

विष्णु-प्रेमाप्लुतो यो [illegible]
सज्जनं तं निर्दिशन्ति [illegible] ॥९॥
[illegible]—ध्यानः । [illegible]

सर्व-भूत दया पूर्ण, सर्व-भूताश्रय-व्रत
धर्म-सत्याम-मोक्षा यः सदा सत्य दायक ॥८॥
कृत-धर्मा निरतो मह्य निष्कामी निर्मलाशयः ।
सज्जनं तं निर्दिशन्ति मुमिक्षा वर्जनाय च ॥१०॥

आर्जवम्—आर्जवभाव: । सरलता । पर-प्रतारणा-राहित्यम् । अकापट्यम् ।

व्रतम्—नियम: । संयम: । "मन-कर्मवचो-विषयो नियत: संकल्पो व्रतम् ।" "इन्द्रियाणामुपावर्तनीय-संकल्पो व्रतम् ।"

आश्रमाणाम् क्रमशो नित्यं सर्वाश्रम-निवासिनाम् ।
गार्हस्थ्यम् सर्व-धर्मेभ्य: श्रेष्ठमित्यभिधीयते ॥११॥

आश्रम:—[आ + श्रम् (तपसि, श्रमे) + घ (अधि)] आश्राम्यन्ति (स्वं स्वं तपश्चरन्ति) अत्र । यत्र मनुष्य: परिश्रम-प्रभावेण तप:-प्रभावेण वर्धते जनता । जीवन-यात्राया अवस्था-विशेष: । स चतुर्विध:—(१) ब्रह्मचर्यं, (२) गार्हस्थ्यं, (३) वानप्रस्थं, (४) संन्यास: ।

पापम्—पाति (रक्षति) आत्मानमस्मात् । नरकहेतु-दुरदृष्टम्-पातकम् ।

न भद्रो हि महाऽऽभेष्यो येन धर्मो विवर्धते ।
आश्रमात् सर्वदा पाप्यं येन धर्मो विवर्धते ॥१२॥

भाविष्य:—उपभोग्य: । To be enjoyed.

पाठ्यम्—पठनीयम् ।

धर्मः स यो नयत्येव मानवं शिव-सन्निधिम् ।
अधर्मो यो नयत्येव दूरं दूरतरं शिवात् ॥१३॥

धर्मः — ध्रियते लोकोऽनेन, धरति लोकं वा [illegible]। पुण्यम्। श्रेयः। 'विहित-क्रियया साध्यो धर्मः पुंसां गुणो मतः। प्रतिषिद्ध-क्रिया-साध्यः स गुणोऽधर्म उच्यते।" इति धर्म-दीपिका॥ धर्म (१) सत्येनोत्पद्यते (२) दयया दानेन च वर्धते, (३) क्षमायां तिष्ठति (४) क्रोधान्नश्यति। Comp "यतोऽभ्युदय-निःश्रेयस-सिद्धिः स धर्मः।" इति काणाद-सूत्रम्॥ "चोदना-लक्षणार्थो धर्मः।" इति जैमिनि-सूत्रम्। "अद्रोहश्चाप्यलोभश्च दमो भूत-दया तपः। ब्रह्मचर्यं ततः सत्यमनुक्रोशः क्षमा धृतिः॥ सनातनस्य धर्मस्य मूलमेतद् दुरासदम्॥" इति मत्स्य-पुराणम्॥ "पात्रे दानं मतिः कृष्णे माता-पित्रोश्च पूजनम्। श्रद्धा बलिर्गवां ग्रासं षड्विधं धर्म-लक्षणम्॥" इति पाद्मोत्तरखण्डम्॥ "ब्रह्मचर्येण सत्येन तपसा च प्रवर्तते। दानेन नियमेनापि क्षमा शौचेन वल्लभ॥ अहिंसया सुशान्त्या च अस्तेयेनापि वर्तते। एतै र्दशभिरङ्गैस्तु धर्ममेव प्रसूचयेत्॥" इति पाद्मे भूमिखण्डम्॥ "अहिंसा-लक्षणो धर्मो हिंसा चाधर्म-लक्षणा।" इति महाभारतम्॥ "वेद-प्रणिहितो धर्मो ह्यधर्मस्तद्-विपर्ययः।" इति भागवतम्॥ "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रिय-निग्रहः। धी र्विद्या सत्यमक्रोधो दशकं धर्म-लक्षणम्॥" इति मनु-संहिता॥ सदाचारः॥

अधर्मः—धर्म-विरोधी। पापम्॥ श्रुति-स्मृति-विरुद्धाचारः॥

ग्राह्यं तद् यन्नयत्येव मानवं ब्रह्मणोऽन्तिकम्।
त्याज्यं तद् यन्नयत्येव मानवं नरकार्णवम्॥ १४॥

तदेव सर्वदा कार्यं येन नैर्मल्यमेधते।
तदेव सर्वदा त्याज्यं येनास्ते दुःखमेधते॥ १५॥

नैर्मल्यम्—"विषयेष्वतिसंरागो मानसो मल उच्यते। तेष्वेव हि विरागस्तु नैर्मल्यं समुदाहृतम्॥" इति प्रायश्चित्ततत्त्वम्। एधते—वर्धते।

जड-बुद्धि नरो हन्त प्राप्यापि दुःख-सागरम्।
पतन्नपि न जानाति शृण्वन्नपि न बुध्यते॥ १६॥

बुद्धिः—(बुध्+क्ति)। निश्चयात्मिकान्तःकरणवृत्तिः। इति वेदान्तसारः। "बुद्धिर्विवेचनारूपा सा ज्ञान-जननी श्रुतौ।" इति ब्रह्मवैवर्ते। [बुद्धिनाशकरा यथा। "शोकः क्रोधश्च लोभश्च कामो मोहः परासुता (अस्थिरता)। ईर्ष्या मानो विचिकित्सा कृपाऽसूया जुगुप्सता। द्वादशैते बुद्धिनाशहेतवो मानसा मलाः।" इति कालिका-पुराणम्। अपिच। "बुद्धि-नाशकरा एते पापकामसमुत्थिताः।"] हन्त!—(विषादे) वा। Alas।

तमाल-पातिनं दुःखम् उद्धर्तुं शोक-वारिधेः।
सतां-सङ्गं शुभं-शास्त्रं विना नास्त्यवलम्बनम्॥१७॥

आत्म-घाती—आत्म-हनन-कर्त्ता। Comp. "नृदेह माद्यं सुलभं सुदुर्लभं, प्लवं सुकल्पं गुरु-कर्णधारम्। मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा॥" इति भागवतम्॥ दुःस्थः—(दुर्+स्था+ड) दुःखेन तिष्ठति यः। दुर्गतः। मूर्खः। इति मेदिनी॥

सज्जनं क्षेमदं शास्त्रं सेवेत यत्न-पूर्वकम्।
भव-पाश-निवृत्त्यर्थं धर्मस्य वर्धनाय च ॥१८॥

क्षेमदम्—कल्याणदम्। मुक्तिदम्।
पाशः—[पश् (बन्धे)+घञ्] पश्यते बध्यतेऽनेन। बन्धनम्। आणवादिमलबन्धः। अविद्याऽस्मितादयश्च।

तृतीयोल्लासः ।

सामर्थ्यं जीवनं स्वास्थ्यं शुभेच्छा—चञ्चलानि वै।
अधुनैव प्रयत्नेन कर्तव्यो धर्म-संग्रहः ॥१॥

अधुनैव भवेत् श्रेष्ठो निर्दोषो गत-किल्बिषः।
पापेभ्यः चित्त माक्षिप्य कल्याणे विनिवेशयम् ॥२॥

किल्बिषम्—पापम्। अपराधः॥
आक्षिप्य—आकृष्य। Withdrawing.

दुर्जनैः सह संसर्गाद् दोषः सांसर्गिको भवेत् ।
सङ्ग-दोषो गुणान् हन्ति, तस्मात्तं परिवर्जयेत् ॥३॥

दोषः—"तस्य (दुष्टस्य) समभिव्याहारतो दोषः ।" इति कणाद-सूत्रम् । "ॐ दुःसङ्गः सर्वथैव त्याज्यः,—काम-क्रोध-मोह-स्मृतिभ्रंश-बुद्धिनाश-सर्वनाश-कारणत्वात् ।" ना: सू: ।

सामीप्याद् भाषणाच्चैव स्पर्शनात् सह-भोजनात् ।
आसनाद् शयना नित्यं पापं संक्रमते नृणाम् ॥४॥

कु-सङ्गं वर्जयेत् तूर्णं कु-चिन्ताञ्च कु-पुस्तकम् ।
कु-द्रव्याणि कु-हास्यानि कु-कर्माणि कु-सौहृदम् ॥५॥

सौहृदम्—सख्यम् । सौहार्दम् ।

असमञ्जस-योषाणां-सङ्गो यथा भयावहः ।
तथा सद्वृत्त-संसर्गो भव-दुःखस्य भेषजम् ॥६॥

असमञ्जसम्—असङ्गतम् । अनुपयुक्तम् ॥
सद्वृत्तः—सच्चरित्र-सम्पन्नः ।

सतां सङ्गेऽवतिष्ठेत सद्-ग्रन्थं सततमभ्यसेत् ।
सच्चिन्तया सुकृत्या च सर्वदा युक्ततां भजेत् ॥७॥

सुकृतिः—सत् कर्म ।

कायेन मनसा वाचा पुण्य-कर्म-परो भवेत् ।
क्लान्तिं नानुभवेज्जातु कर्तव्ये धर्म-कर्मणि ॥८॥

जातु—कदाचित

त्वमेव ध्यात मनं विषयादि न च विना
धर्मोद्यम समाप्य धारय धर्मिनागत ॥९॥
तं विना—तम विना। गानगेन कल्याण उद्योग

अनलसत्वं कलङ्कस्य कल्याण सुख मदः
अनलसत्वे तमाच्छन्न सर्व दृष्टि दुर्निरीक्षिता ॥१०॥
तमाच्छन्नं—तमसाच्छन्नम् तम ॥ तमोगुण रत्नसार-
टीकायां रायमुकुट ॥

अनलसत्वात् परस्यापि निश्चित भवति नाश
अवसादाद् अनुत्साहाद् भवेत् तथा अधोगति ॥११॥
अवसाद:—अवसन्नता। विषाद जडता स्फूर्ति-
हीनता।

आत्म-निर्भर-शीलानां विघ्ननाश सहायक
अतो नित्यं निरातङ्क. पौरुषं यत्न माचरत् ॥१२॥
पौरुषम्—पुरुषत्वम्। तेज:। साहसम्। उद्यम।
Manliness, heroism, prowess, valour.

समयश्च जल-स्रोत: प्रतीक्षेते न कस्मिनम्।
अतस् शीघ्र मधर्माणां बीजान्युत्पाटयेत् पुमान् ॥१३॥

पूर्वाह्नः—द्वतीयोल्लासः।

समयः—[सम्+इ (गमने)+अ]
स्रोतः—स्वतः (स्वयम्) अम्बूनां सरणम् (वेगेन गमनम्)।
समयश्च......न जल्पितम्—"Time and tide wait for no man".

कामं क्रोधं मदं मोहं लोभं दम्भं विनाशयेत्।
मिथ्याचार मनाचारं मात्सर्यञ्च परित्यजेत् ॥१४॥

मदः—गर्वं। मत्तता। इति हेमचन्द्रः॥ "अहं महात्मा धनवान् मनुष्यः कोऽस्ति भूतले। इति यज्जायते चित्ते मदः प्रोक्तः स कोविदैः॥" इति पाद्मे क्रियायोगसारे॥

मोहः—अविद्या। देहादिषु आत्म-बुद्धिः॥ "मम पिता मम माता ममेयं गृहिणी गृहम्। एवम्विधं ममत्वं यत् स मोह इति कीर्तितः॥" इति पाद्मे॥

मिथ्याचारः—कपटाचारः॥ अनाचारो द्विविधः—(१) विहितस्य अनुष्ठानाभावः, (२) निषिद्धस्य आचरणञ्च॥

मात्सर्यम्—पर-शुभ-द्वेषः।

अश्लील-भाषणं नर्म पारुष्यं व्यर्थ-भाषणम्।
आत्म-प्रशंसनं मिथ्या पैशुन्यं पर-निन्दनम् ॥१५॥
स्तैन्यं विश्वास-घातञ्च परस्यानिष्ट-चिन्तनम्।
समूलं वर्जयेत् सर्वं चित्त मालस्य चेतसा ॥१६॥

अश्लीलम्—[अ+श्री+ल (अस्त्यर्थे)] कुत्सितम्। शिष्ट-समाज-विरुद्धम्। लज्जाप्रदम्॥ नर्म—परिहासः॥

ख

श्रद्धां भक्तिं भजेत् ध्येये सद्भावं सद्विमर्शनम् ।
कुर्यात् सर्व-प्रयत्नेन सर्व-भोग-विसर्जनम् ॥१९॥

प्रेमान्वितः सदा कुर्यात् सर्वेषां क्षेम-चिन्तनम् ।
अनुक्रोश-परः प्राज्ञः सेवेत विश्व-चेतनान् ॥२०॥

क्षेमः—[क्षि (क्षये)+म] यत् दुःख-क्षयं करोति। कुशलम्। कल्याणम्। मोक्षः।

अनुक्रोशः—करुणा, दया। पर-दुःख-प्रहरणेच्छा-रूप-दयया हि पर-क्रोशं (रोदनं) दृष्ट्वा तदनु रोदनं क्रियते इति तथ्याख्यायात्वम्। विश्व-चेतनान्—सर्वान् प्राणिनः।

शिष्टाचारं समानित्वं नम्रतां समुपालयेत् ।
विद्या-विनय-सम्पन्नः कामयेत सदाऽऽत्मकम् ॥२१॥

शिष्टाचारः—शिष्टानामाचारः। सद्-व्यवहारः। साधु-व्यवहारः।

समानित्वम्—[मानः=चित्त-समुन्नतिः। इत्यमरः॥ मत्-समो नास्ति इति मननं मानः। इति तट्टीकायां भरतः। आत्मनि पूज्यता-बुद्धिः। इति नीलकण्ठः। "मोहो धर्म-विमूढत्वं, मानस्त्वात्माभिमानिता।" इति भविष्य-पुराणम्।]

अपवर्गः—मोक्षः। निर्वाणम्

पादः, (१८) हस्तः, (२०) मुखं, (२१) प्रकृतिः, (२२) मनः, (२३) बुद्धिः, (२४) अहङ्कारः ।] [एतानि चतुर्विंशति-तत्त्वानि जीवात्म-परमात्मानौ च ज्ञातव्यानि।]

नो च विद्या-समा शक्ति र्नो च विद्या-समं शिवम् ।
नो च विद्या-समा वृद्धि र्नो च विद्या-समं फलम् ॥४॥

शक्तिः—"परमोत्तम-पुरुषार्थ-साधनीभूता विद्या ब्रह्म-स्वरूपा ॥" फलम्—विद्या सर्व-फलदा, स्वयमेव फलरूपा च ।

नो च विद्या-समो बन्धु र्गुरूणां गुरुरेव सा ।
तामादौ ग्रहय। विद्यां लभेत यत्न-पूर्वकम् ॥५॥

सम्प्राप्ते पञ्चमे वर्षे बालाया बालकस्य च ।
दिने पुण्ये, शुभे काले विद्यारम्भः सुमङ्गलः ॥६॥

जातु नातिवर्त्तेतैव शिक्षायाः समयो नृणाम् ।
अतोऽभ्यसेत् सदा विद्यां चतुर्वर्ग-प्रदायिकाम् ॥७॥

चतुर्वर्गः—धर्मार्थ-काम-मोक्षम् । इत्यमरः ॥

विद्यारम्भे गिरां-देवीं प्रार्थयेदम्बिकां शुभाम् ।
भारतीं वागधिष्ठात्रीं कोटि-चन्द्र-सम-प्रभाम् ॥८॥
शुद्ध-सत्त्व-स्वरूपाञ्च विशुद्ध-पद्मासनाम् ।
सर्व-ज्ञानात्मिकां वाणीं हंसारूढां सरस्वतीम् ॥९॥
वेदादि-सर्व-शास्त्राणां जननीं परमेश्वरीम् ।
कवीनां विदुषाञ्चैव परमा मिष्ट-देवताम् ॥१०॥

सौम्या—[सोम+ष्यञ्] मनोज्ञा। सुदृश्या। "सौम्या
सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी।" इति देवी-माहात्म्यम्॥
मातृका—[मातृ+क+टाप्] माता। धात्री। ज्ञानाधार-
ता शक्तिः। विश्व-जननी परावाक्शक्तिः। "ज्ञानाधिष्ठानं
मातृका।" इति शिव-सूत्रे। वर्ण-मातृका—सरस्वती।

नृत्यम्—ताल-मान-रसाश्रय-मविलासाङ्गविक्षेपः। तत्
त्रिविधम्। यथा। (१) ताण्डवम्=उद्धतं नृत्यम्।
(२) लास्यम्=सुकुमार-नृत्यम्। (३) नृत्तम्=भावाश्रयं
नृत्यम्॥ "गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः। लय-
ताल-समारब्धं ततो नृत्यं प्रवर्तते॥" इति सङ्गीत-दामोदरे॥
["यो नृत्यति प्रहृष्टात्मा भावै र्बहु सुभक्तितः। स निर्दहति
पापानि जन्मान्तर-शतेष्वपि॥" इति श्रीभागवते॥ "नृत्यतां
श्रीपतेरग्रे तालिका-वादनै र्भृशम्। उड्डीयन्ते शरीरस्थाः
सर्वे पातक-पक्षिणः॥" इति हरि-भक्ति-विलासे॥]

सङ्गीतम्—गानम्। "गीतञ्च द्विविधं प्रोक्तं यन्त्र-गात्र-
विभागतः। यन्त्रं स्याद् वेणु-वीणादि गात्रन्तु मुखजं मतम्॥"
["ताल-वाद्यानुगं गीतं नटीभि र्यत्र गीयते। नृत्यस्यानुगतं रङ्गे
तत् सङ्गीतञ्च कथ्यते॥"] सङ्गीतं—सोमेश्वर-भरत-हनुमत्-
कल्लिनाथ-मत-भेदात् चतुर्विधम्। [भक्ति-पूर्वकं नृत्य-गीत-वाद्यै
र्भगवदाराधनं कृत्वा मानवो महत् फलं माप्नोति॥ "गानात्
परतरं न हि।" "गीतज्ञो यदि गीतेन नाप्नोति परमं पदम्।

पूर्णाङ्कः—चतुर्थीकामः।

वीणा — सप्तस्वरयान-वाद्यम्। सा तु सप्ततन्त्री-युक्ता। षड्-भेदो यथा। (१) शिवस्य वीणा नन्दी, (२) सरस्वत्याः कच्छपी, (३) नारदस्य महती (४) गणानां प्रभावती, (५) विश्वावसोः बृहती, (६) तुम्बुरोः कलावती, (७) चाण्डालानां चाण्डोल-वीणा चाण्डालिका च।

वराभीति-कराम् — "यथाऽस्यतो दक्ष-हस्तः प्रयतो वर-मुद्रिका। लम्बितो वाम-हस्तः प्रयतोऽभय-मुद्रिका।"

दुर्गा—"दुर्गा देवि महाविघ्ने भव-बन्धे कु-कर्मणि। शोके दुःखे च नरके यम-दण्डे च जन्मनि। महाभयेऽतिरोगे चाप्याशब्दो हन्तृ-वाचकः। यतान् हन्त्येव या देवी सा दुर्गा परिकीर्तिता।" त्रिकालज्ञा—सर्वज्ञा।

अर्कः—सूर्यः। इन्दुः—चन्द्रः। विलोचनम्—चक्षुः।

चन्द्रार्धम्—अर्धचन्द्राकृति-वर्णः। नादः। नादः=अर्धेन्दुः, अर्धमात्रा, अनुस्वारः, तुरीया, विश्वमातृकला, परा। इति बीजवर्णाभिधानम्। "नादरूपा महेशानी चिद्रूपा परमा कला।" इति कुब्जिका-तन्त्रम्।

धृतिः—[धृ (धारणे)+क्ति] धारणा। धैर्यम्। स्थैर्यम्। उत्साह.। इच्छा। Firmness, steadiness, energy, resolution

मेधा—धारणावती बुद्धिः। Retentive faculty, retentiveness (of memory). मेधाकरणी यथा। (१) सतता-

षड्ज्यादयस्तो भूत्वा तेनैव सह मोदते ॥" इति सङ्गीत-दामोदरे ॥ "यथाविधि कृतं गानं ममचानन्दं विशत् ।" "गानमतु परमं ब्रह्म । इति बृहद्धर्मपुराणे ॥ ईश्वरात्मकं विश्व यत् नृत्य गीत-वाद्यादिकं तद् भगवत्—कामयं कामदञ्च ॥]
[गानमाहात्म्य-राग-विवरणं 'राग' शब्दे टीकापरिशिष्टे द्रष्टव्यम् ।]

वादित्रम्—वाद्यम् । [वादयन्ति ध्वनयन्ति यत्] "तानेन राजते गीतं तालो वादित्र-मध्यगः । गीतेन सोऽपि वादित्रं तच्चतुर्विधमुच्यते ॥ ततं शुषिरमानद्धं घनं मिश्रं चतुर्विधम् ॥" (१) ततं = तन्त्रीगतं वाद्यं — वीणादिकम् । (२) शुषिरं = वंशयादिकम् । (३) आनद्धं — चर्मावनद्धमुख-वाद्यं —मृदङ्गादिकम् । (४) घनं = कांस्यतालादिकम् ॥

स्वरः—स्वरन्ति शब्दायन्ते स्वराः । इति भरतः ॥ तन्त्री-कण्ठोत्थित-सप्तध्वनिः । "षड्ज-ऋषभ-गान्धारा मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः ॥" [टीका-परिशिष्टे द्रष्टव्यः ।]

तालः—[तल् (प्रतिष्ठितो) + घ] [यस्मिन् नृत्य-गीत-वाद्यानि प्रतिष्ठितानि भवन्ति सः ।] गीत-काल-क्रिया-मानम् । "एवं स्वर इयत्कालं गेयः, इयत्कालं विलम्बितम्, इयत्कालं द्रुतम्, इयत्कालं मध्यममिति बोधयितुम् हस्ते हस्ते रङ्गुल्याकुञ्चन-प्रसारणादि-क्रियाभिः 'तितिक्ष' मातव्यञ्चेति काल-क्रिययोः प्रमाणं तालः ।" इति सङ्गीत-शास्त्रम् ॥

पूर्वोक्तः—चतुर्थोल्लासः ।

भ्रमः—मिथ्या ज्ञानम् । भ्रान्तिः । भ्रमो द्विविधः—(१) विपर्यासः, (२) संशयश्च । आद्यो यथा । देहे आत्म बुद्धिः । शङ्खादौ पीतता-मतिः । स निश्चय-रूपा ॥ द्वितीयो यथा । 'किंस्वित् नरो वा स्थाणु र्वा'-इत्यादि-बुद्धिः । तस्य कारणम्—पित्त-दूरत्व-मोह-भयादि-नानाविध-दोषाः ॥ (मायाङ्कस्य षोडशोल्लासो द्रष्टव्यः ।)

एवं ज्ञात्वा सम्यक्त्वे मार्गोऽप्यर्थं मतिं नरः ।
श्रद्धया परयोपेतः शिक्षकं दण्डवन्नमेत् ॥२३॥

नाना-वाक्यै रुपायैश्च शिक्षयेद् बोधयेत् सदा ।
स्नेहवान् गुण सम्पन्नो योग्यः स्यात् स शिक्षकः ॥२४॥

शिक्षकस्य गुण-ग्राही सद्योत्साहः सुतीक्ष्ण-धीः ।
स्ववच्छादक स्तस्य दोषाणां,—छात्र उच्यते ॥२५॥

विद्यानामिव शिक्षार्थं शिक्षकेण प्रयोजनम् ।
योग्य-शिक्षा-गुरुं लब्ध्वा तदधीनो भवेन्मुदा ॥२६॥

मुदा—हर्षेण ।

शिक्षा-गुरुं प्रणम्याथ प्रणमेत् शङ्करं हरिम् ।
शुद्धासने समासीनो विद्या-ग्रहण-तत्परः ॥२७॥
सर्वान् वर्णान् पठित्वाऽऽदौ लिखेत् ततो यथा-क्रमम् ।
सुसम्पूर्णान् समान् सर्वान् प्रणिधानेन सुन्दरम् ॥२८॥

प्रणिधानेन—प्रयत्नेन । मनोयोगेन ।

ध्ययनम्, (२) तत्त्व-ज्ञान-कथा, (३) आचार्य-सज्जन-सच्छास्त्र-सेवा, (४) संयमः ॥ मतिः—बुद्धिः । Intellect, understanding, judgment. प्रज्ञा—प्रकर्षेण जानाति या; धीः, तीक्ष्ण-बुद्धिः । *Keen intelligence, wisdom,* discrimination. स्मृतिः—स्मरणम् । अनुभूत-विषय-ज्ञानम् । Remembrance, memory.

पातकम्—पातयति अधोगमयति यत् तत् । नरक-साधनमिति यावत् । अशुभं, दुष्कृतं, कलुषम् ॥ तत् त्रिविधम्—(१) कायिकं, (२) वाङ्मयं, (३) मानसम् ॥

अर्चयेत् प्रणमेद् भक्त्या प्रार्थयेत कृताञ्जलिः ।—
"कृपां कुरु जगन्मातः विद्या-हीनं जडञ्च माम् ॥१८॥
ज्ञानं देहि स्मृतिं देहि योगं देहि वरानने ।
प्रतिभां निर्मलां देहि नमस्ते ज्ञान-लोचने ॥२०॥
यया विना जगत् सर्वं जडोन्मत्त-पिशाचवत् ।
भ्रमान्धकार-नाशिन्यै तुभ्यं नित्यं नमो नमः ॥२१॥
संसार-सागरोत्तार-पोत-रूपे नमोऽस्तु ते ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥"२२॥

वरानना—लावण्ययुक्तवदनविशिष्टा । A lovely-faced lady. प्रतिभा—असामान्य बुद्धिः । प्रत्युत्पन्न-मतित्वम् । नवनवोन्मेषशालिनी प्रज्ञा ।

पिशाचः—[पिशित (पाल-मांसम्)+आश (अशनकारी, भोक्ता)] प्रेत-योनि-विशेषः । देव योनि-विशेषः ।

साहित्यम्—अलङ्कार-व्याकरण छन्दादिभिः सह यत् काव्यम् । (रघु-कुमारसम्भव-मेघदूत-भट्टि-नैषधीय-प्रभृतयः— संस्कृतभाषायाम्, एवम् अन्यत्र च ।)

इतिहासः—पुरावृत्तम् । History.

पुराणम्—व्यासादिप्रणीत - वेदार्थवर्णित - पञ्चलक्षणान्वित-शास्त्रम् । (पञ्चलक्षणानि यथा । (१) सर्गः, (२) प्रतिसर्गः, (३) वंशः, (४) मन्वन्तरं, (५) वंशानुचरितं च ।) अष्टादश-महापुराणानि—"निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः । व्यास-रूपेण कृतवान् पुराणानि महीतले ॥ पठनात् श्रवणाद् येषां नृणां पापक्षयो भवेत् । धर्माधर्म-परिज्ञानं सदाचार-प्रवर्तनम् ॥ गतिश्च परमा तद्वद् भक्तिर्भगवति प्रभौ । तानि ते कथयिष्यामि सप्रमाणानि भूतले ॥" "आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः । पुराण-संहितां चक्रे पुराणार्थ-विशारदः (व्यासः) ॥ प्रख्यातो व्यास-शिष्योऽभूत् सूतो वै लोमहर्षणः । पुराण-संहितां तस्मै ददौ व्यासो महामुनिः ॥" उपपुराणानि बहूनि । अष्टादशोपपुराणानि प्रसिद्धानि ॥

काव्यम्—"वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥" [रसः—विषयाण दर्शन-स्पर्शन-श्रवण-पठन-चिन्तनादिभिः भावुक-जन-हृद सुख-दुःख-उत्साह-क्रोध-अनुराग-भय-विस्मय वैराग्यादयो अनिर्वचनीया भावा जायन्ते, ते स्थायित्वं प्राप्य यदा च

एवमारभ्य विद्यार्थे प्रयतेत कृत-श्रमः ।
सर्वावश्यक विद्यासु शिक्षणीया यथोचितम् ॥२८॥

कृतश्रमः—महोत्माहः ।

वेदाङ्गानि सुमाहित्यम् इतिहासं पुराणकम् ।
काव्यं पदार्थ-विज्ञानं गणितं तर्क-शास्त्रकम् ॥३०॥
वैद्यकं धर्म-शास्त्रञ्च नीतिं वेद-चतुष्टयम् ।
योग-विद्याञ्च मन्त्रान् भक्ति-ज्ञान-विवर्धनान् ॥३१॥
सिद्धान्त-मोक्ष-शास्त्राणि शिल्प-शास्त्रं फल-प्रदम् ।
पठेत् सर्वाः शुभा विद्या धैर्योद्यम-समन्वितः ॥३२॥

वेदाङ्गम्,—श्रुत्यवयव-षट्प्रकार-शास्त्रम् । तद् यथा । (१) शिक्षा (उच्चारण-शिक्षा-विषयकं शास्त्रम्), (२) कल्पः (यागक्रियाणामुपदेश-विषयकं शास्त्रम् । सूत्र-ग्रन्थः ।—वेदस्य ब्राह्मणभागात् सारतत्त्वं सूत्राकारेण ग्रथितम् ।), (३) व्याकरणम् (व्याक्रियन्ते व्युत्पाद्यन्ते साधु-शब्दा अस्मिन् अनेनेति वा । साधु-शब्दान्वाख्यानविषयकं शास्त्रम् । तत्र साध्य-साधन-कर्तृ-कर्म-क्रिया-समासादि-निरूपणम् ।), (४) निरुक्तम् ("निरुक्तं पद-भञ्जनम् ।" वर्णागमो वर्णविपर्ययश्च इत्यादिना नियमेनोक्तं निरुक्तम् । वेद-व्याख्या-शास्त्रम् । वैदिकाभिधानम् ।), (५) ज्योतिषम् (ग्रहणादि-गणनशास्त्रम् ।), (६) छन्दः (श्रुति-च्छन्दसां प्रत्यायकं शास्त्रम् ।)

साहित्यम्—अलङ्कार-व्याकरण-छन्दादिभिः सह यत् काव्यम् । (रघु-कुमारसम्भव-मेघदूत-भट्टि-नैषधीय-प्रभृतयः—संस्कृतभाषायाम्, एवम् अन्यत्र च ।)

इतिहासः—पुरावृत्तम् । History.

पुराणम्—व्यासादिप्रणीत - वेदार्थवर्णित - पञ्चलक्षणान्वित-शास्त्रम् । (पञ्चलक्षणानि यथा । (१) सर्गः, (२) प्रतिसर्गः, (३) वंशः, (४) मन्वन्तरं, (५) वंशानुचरितं च ।) अष्टादश-महापुराणानि—"निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः । व्यास-रूपेण कृतवान् पुराणानि महीतले ॥ पठनात् श्रवणाद् येषां नृणां पापक्षया भवेत् । धर्माधर्म-परिज्ञानं सदाचार-प्रवर्तनम् ॥ गतिश्च परमा तद्वद् भक्ति र्भगवति प्रभौ । तानि ते कथयिष्यामि सप्रमाणानि भूतले ॥" "आख्यानैश्चाप्युपाख्यानै र्गाथाभिः कल्पशुद्धिभिः । पुराण-संहिता चक्रे पुराणार्थ-विशारदः (व्यासः) ॥ प्रख्यातो व्यास-शिष्योऽभूत् सूतो वै लोमहर्षणः । पुराण-संहितां तस्मै ददौ व्यासो महामुनिः ॥"

उपपुराणानि बहूनि । अष्टादशोपपुराणानि प्रसिद्धानि ॥

काव्यम्—"वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः । उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥" [रसः—विषयाण
दर्शन-स्पर्शन-श्रवण-पठन-चिन्तनादिभिः भावुक-जन-हृद
सुख-दुःख-उत्साह-क्रोध-अनुराग-भय-विस्मय-वैराग्यादयो
अनिर्वचनीया भावा जायन्ते, ते स्थायित्वं प्राप्य यदा अ

कारणम् माद्रीक्रुर्वन्ति सदा ते भावा 'रस' शब्द-वाच्या भवन्ति। रसा यथा। (१) शृङ्गार रसः (काम-स्पृहा-जनितो रसः)। (२) वीर-रसः (दान-धर्म युद्धेषु उत्साहापेक्षात्मकाहङ्कारो रसः)। (३) करुण रसः (इष्टनाश-क्लेश उपतापादि - जनित-शोक-भावः)। (४) अद्भुत-रसः (असम्भावित-मत्यांस्तराल-गमनादि रूप स्थायि-भावः)। (५) हास्य-रस (कौतुकाङ्कुरो रसः)। (६) भयानक-रसः (राक्षसादि भय जन्य. स्थायि-भावः)। (७ वीभत्स-रसः (घृणाकर-पूय-रक्तादिजो भावः) (८ रौद्र रस. (क्रोधोत्पादको रसः)। (९) शान्त रस (शास्त्र दर्शन जनितो वैराग्य-जनितो वा या शान्तिस्तदुत्पादक स्थायि-भाव)। (१०) वत्सल रस (पुत्रादि स्नेहोत्पादकः स्थायि भावः)।

पदार्थ-विज्ञानम्—पदार्थ-सम्बन्धीय शास्त्रम्। All kinds of science.

गणितम् — अङ्क-शास्त्रम्॥ तर्कशास्त्रम् न्याय विद्या। आन्वीक्षिकी। तर्कविद्या। वैद्यकम्-- चिकित्सा-शास्त्रम्।

धर्म-शास्त्रम्—मन्वादि प्रणीत-शास्त्रम्। स्मृतिः। धर्म संहिता। "मन्वत्रि - विष्णु-हारीत - याज्ञवल्क्योशनोऽङ्गिराः। यमापस्तम्बसंवर्ताः कात्यायन बृहस्पती। पराशर-व्यास-शङ्ख-लिखिता दक्ष गौतमौ। शातातपो वसिष्ठश्च धर्म-शास्त्रप्रयोजकाः॥" एते प्रधानानि, अन्येऽपि सन्ति।

पूर्वाङ्कः—चतुर्थीकाशः।

नीतिः—नीयन्ते उन्नीयन्तेऽर्थाः अनया वा। नीति-शास्त्रम्। नयः॥ सिद्धान्तः — पूर्व-पक्षं निरस्य सिद्ध-पक्ष-स्थापनम्।

पठेत्—[पाठः—विधिना शास्त्रस्याध्ययनम्।] श्रीभगवन्तं प्रणम्य पाठमारभेत। गुरोः सामर्थ्यानुरूपेण पठितव्यम्। शौचा-चार-समन्वितः सन् गुर्वाज्ञां लब्ध्वा गुर्वधीनो भूत्वा अध्ययनं कुर्यात्।

पठेच्च चिन्तयेद् धीरो युक्तिभिश्च स्मरेत् ततः।
शास्त्रार्थं सम्यग्विज्ञाय वारंवारं समभ्यसेत् ॥२३॥

नीति-धर्म-सदाचार-विरुद्धं कु-पुस्तकम्।
अवद्यं मोहनं सर्वं सर्वदा परिवर्जयेत् ॥२४॥

नीतिः—morality. अवद्यम्—कुत्सितम्। निन्दितम्। निकृष्टम्। मोहनम्—मोह-कारणम्।

विद्यते सागरस्यान्तो, विद्यानान्तु न विद्यते।
पठनीया हि सा विद्या, याभि धर्मो विवर्धते ॥२५॥

पन्थाश्च मनुकूलं यद् यथायोग्यं समाचरेत्।
मार्गणीयं पदं यदि बाटे शास्त्र-विरोधिनि ॥२६॥

बाटः—मार्गः। "पठकाः पाठकाश्चैव ये चान्ये शास्त्र-चिन्तकाः। सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः॥" इति महाभारते॥

महातरुः । छिन्नो विद्या-कुठारेण ते गता प्रथमोऽङ्कुरे ।" "एतत् किञ्चिदिदमायाति सुख-दुःख-मयं भवे । तदहङ्कार-पत्रस्य सविकारो विजृम्भते ।" इति योग-वासिष्ठे ।

अहङ्कारे क्षयं प्राप्ते ताप-त्रयं प्रणश्यति ।
अहङ्कारे क्षयं प्राप्ते शान्ति चित्ते नितिष्ठति ॥२॥

तापत्रयम् — आध्यात्मिक-आधिभौतिक-आधिदैविक-ताप-त्रयम् । नितिष्ठति—is established. "अहङ्कारानुसन्धान-वर्जनादेव राघव । पौरुषेण प्रयत्नेन तीर्यते भव-सागरः ।" इति योग-वासिष्ठे ।

"कर्त्ता भोक्ता मदेवाहं ज्ञाता द्रष्टा महानहम् ।
अहमितममिदञ्च मयैवेदं स्वनुष्ठितम् ॥३॥
महात्माऽहं महाप्राज्ञो सर्व-शास्त्रार्थ-कोविदः ।
सर्व-सौन्दर्य-सम्पन्नो महातेजा महाबलः ॥४॥
गरिष्ठोऽहमहं श्रेष्ठः सर्व-पूज्यः सुनिश्चितम् ।"—
सर्वमित्यादिकं चैवं मोहजं बन्ध-कारणम् ॥५॥

गरिष्ठः —गुरुतमः । Most venerable. श्रेष्ठः—best.

यावच्च जायते गर्वो, यावत्तिष्ठति मन्नता ।
तावद्देवोऽर्पितः पुंस स्तावद्विपर्याय-सम्भवः ॥६॥

सर्वदैव जगन्नाथः करुणा-वरुणालयः ।
वितरत्यविशेषेण सर्वेभ्यो महतीं कृपाम् ॥७॥

सा कृपा तु न भोगाय दम्भिना मभिमानिनाम् ।
मत्वेशं सर्व-कर्तारं, दम्भं दर्पं ततस्त्यजेत् ॥८॥

दम्भ —vanity. दर्पः—pride

'ईश्वरेण कृतं सर्वं किञ्चनापि न वै मया ।'—
इत्येव कथितं ज्ञानं भव-बन्ध-विमोचनम् ॥९॥

ईशाधीनं जगत् सर्वं, तत् कृपैव बलं नृणाम् ।
तत्-कृपैका भवत्येव समागामय-भेषजम् ॥१०॥

विश्व-राड् महादेव सर्वेन्द्रियैः सदाऽर्चितः ।
स्मैत करुणा तस्य पूर्णस्य परमात्मनः ॥११॥

विश्वराजः—(१) विश्वेषु राजते यः सः । (२) विश्व[illegible]

नान्यत्तस्मादृते किञ्चित्, स वै सर्व चराचरम् ।
दाता भोक्ता स विश्वेशः कर्ता धाता सर्वाश्रयः ॥१२॥

चराचरम्—स्थावर-जङ्गम-रूपं जगत् ।

तस्मिन् नित्ये स्थितं सर्वं, स एकः सर्व-कारणम् ।
तस्मिन् प्रलीयते सर्वं नित्य-पूर्णे परात्परे ॥१३॥

सगुणः स स्वयंज्योतिः मायातीतश्च निर्गुणः ।
स हि भक्तानुकम्पार्थं गृह्णीते दिव्य-विग्रहम् ॥१४॥

निर्गुणः—सत्त्व-रजस्तमोगुणातीतः ।

तस्य नाम-'वर्ष्टानन्य सत्ता स्तुत-गत-मानसाः ।
कुर्वन्ति बहु-नामानि नाना-भाव-समाश्रिताः ॥१५॥

केचिदाहु: 'परं ब्रह्म', केचिदाहु: 'परात्पर:' ।
केचिदाहु: 'परा सम्वित्', केचिद् वा 'परम:-शिव:' ॥१६॥
परमात्मा महाविष्णु र्भगवान् परमेश्वर: ।
कृष्णो राम: शिवा दुर्गा नारायणो हरो हरि: ॥१७॥
इत्यादीनि शतैर्व्यापि नामान्युक्तानि भावुकै: ।—
प्रत्येकं नियतं नाम तस्यैकस्यैव वाचकम् ॥१८॥

परात्पर:—श्रेष्ठादपि श्रेष्ठ: । "द्रष्टा: कालस्य कालोऽहं विधाता विधिरेव च संहार-कर्तुः संहर्ता पातुः पाता परात्-पर: ॥" इति ब्रह्म-वैवर्ते । सम्वित्—ज्ञानम् । चैतन्यम् ॥

शिव:—'शिवं' कल्याणं विद्यते अस्य । शेते अस्मिन्निति वा । शेरते अवतिष्ठन्ते अणिमादय: अष्टौ गुणा अस्मिन् इति वा ।

परमात्मा—"चैतन्यमात्मा ।" "चैतन्यमिव एवात्मा ।" 'चिद्धर्मा आत्मा ।'

विष्णु:—(विश् + नुक्) वेवेष्टि व्याप्नोति विश्वं य: । वेवेति निवृति आप्याययति विश्वमिति वा । विष्णाति वियुनक्ति भक्तान् मायापाशेभ्य संसारादिति वा । विशति सर्वभूतानि विशन्ति सर्वभूतानि अत्र इति वा ।

भगवान्—(भग + वतु) "यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् । अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम् ॥ विभुं सर्वगतं नित्यं भूतयोनिमकारणम् । व्याप्यव्याप्यं यत: सर्वं तं पश्यन्ति सूरय: ॥ तद् ब्रह्म तत् परं धाम तद् ध्येयं मोक्ष-

णेन प्रकीर्तिता।" "शिवो हि मोक्षवचन शकारो दातृवाचकः। स्वयं निर्वाण-दात्री या सा शिवा परिकीर्तिता॥"

नारायणः—(नार + अयन)। "सारूप्यमुक्तिवचनो नारेति च विदु र्बुधाः। यो देवोऽप्ययनं तस्य स च नारायणः स्मृतः॥" "आपो नारा इति प्रोक्ता आपो वै नर-सूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥"

हरः—हृ + अच्॥ हरिः—हृ + इ।

तं परेशं हृषीकेशं सच्चिदानन्द मव्ययम्।
शुचिरास्तिक्य-पूतात्मा सर्वदैव प्रपूजयेत्॥१९॥

हृषीकेशः—हृषीकाणामिन्द्रियाणां स्वामी नियन्ता हृषीकेशः। परमात्मत्वात्।

आस्तिक्यम्—वेदे, धर्मे, ईश्वरे च श्रद्धा।

तत्-कृपाया भवेन्मुक्ति र्भुक्तिः करतले स्थिता।
भक्तानुग्राहकं देवं पूजयेत् तमनन्यधीः॥२०॥

अनुग्रहः—दुःख-दूर-करणेच्छा। अनिष्ट-वारण-पूर्वकेष्ट-साधनम्।

कृपाऽवलोकने तस्य गुणन्ति निर्गुणं गुणैः।
स हि धन्यः स हि श्लाघ्यो येन लब्धः कृपा-कणः॥२१॥

गुणन्ति.. गुणैः—"मूकं करोति वाचालं, पङ्गुं लङ्घयते गिरिम्॥" धन्यः—पुण्यवान्। सुकृती।

निष्कामेन-चित्तेनैव तत् कृपा, मत् चिन्तनम्
यदि तद् ध्येय मौनं दुर्दिनं तत संचिन्तनम् ॥२२॥
साधनम् निरर्थकम् निष्फलम्

यन्मूर्त्तौ व्यतिक्रान्तो भगवत्करुणां विना
तदर्थे साधन कार्यम् यस्मात् दुःसहम् ॥२३॥

संसार सर्प-दष्टानाम् एकमेव सुभेषजम्
सर्वास्ववस्थासु सर्वत्र सर्वदा हरि-चिन्तनम् ॥२४॥

वदेन्नान्यद् भजेन्नान्यद् नान्यत् कदापि चिन्तयेत्
नान्यच्च शृणुयाद् विद्वान् सदा राम मनो भवेत् ॥२५॥

मुकुन्दं चिन्तयेन्नित्यं पूर्ण-प्रेम स्वरूपकम्
सर्वाधारं निराधारं शङ्करं हृदयालयम् ॥२६॥
मुकुन्दः—"मुकुं भक्तिरसप्रेमवचनं वेद सम्मतम् । यद्
ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्तितः ॥" इति ब्रह्मवै० ।

ध्यात्वैवं परमात्मानं भगवन्तं सर्वेश्वरम्
विन्देत ममतां तस्मिन् तत्-कारुण्य प्रभावतः ॥२७॥

निष्काम-ममता-युक्तो विष्णु-चिन्तन-तत्परः ।
इन्द्रियाणि समस्तानि कुर्यादन्तर्मुखाण्यरम् ॥२८॥
अरम्—शीघ्रम् ।

अनन्य-विषयं कृत्वा मनो बुद्धिं लभेत च ।
अनन्यां ममतां शम्भौ परम-प्रेम-संप्लुताम् ॥२९॥

अनन्या—अन्यैः सह सम्पर्क-रहिता।
शम्भुः—[शं (कल्याणं)+भू+उ (अपादाने)]॥
संभूता—जाता। अभिविद्धा।

अनन्यः ममता शम्भौ जायते बहु-भाग्यतः।
सैवावलम्बनं नृणां सैवावलम्बनं परम् ॥२०॥

विशोकं पदमासाद्य अनन्य-प्रेम-योगतः।
क्षामयेत् सर्वदाऽऽत्मानं शुद्धे बुद्धेऽव्यये पदे ॥२१॥
विशोकः—शोक-रहितः॥ अनन्यम्—अन्यैः सह सम्पर्क रहितम्। भेद-विरहितम्॥ पदे—स्थाने। वस्तुनि।

परमो निर्मला भूत्वा क्षेत्रज्ञं ब्रह्मणि न्यसेत्।
हृत्ति-हीनं मनः कृत्वा शिवे जीवं विलापयेत् ॥२२॥
क्षेत्रज्ञः—[क्षेत्रं शरीरं जानाति, क्षेत्रे शरीरे वा जानाति (ज्ञानवान् भवति)] जीवात्मा।
विलापयेत्—विलीनं कुर्यात्।

शान्तो योगी भवेदित्थं मुनिर्यत्र जितेन्द्रियः।
सत्सिद्धिं परमामित्थं शान्तिं विन्देत शाश्वतीम् ॥२३॥
सत्सिद्धिः—परमा सिद्धिः। मोक्षः।

तोयं विना यथा तृष्णा निश्चितं न प्रणश्यति।
ब्रह्म-प्राप्तिं विना जीवो दुःखान्तं नैव गच्छति ॥२४॥

षष्ठोल्लासः।

मज्जनं पावने नित्ये महानन्द महोदधौ।
दुष्करं विदितं पुंसां सद्‌गुरोः करुणां विना ॥१॥

महानन्दः—परमानन्दः। मोक्षः।

गुरुः—(गृ + कु) गिरति अज्ञानं, गृणाति (उपदिशति) धर्मं यः सः॥ "विरलन-तमो-गुष्टं जन्तोरन्तर मेव हि। को हन्ता श्रीगुरोः पादाविर्मलं कुरुतेऽर्चिषः॥"

संसार-पाश-बद्धानाम् आत्यन्तिक-विमुक्तये।
गुरुरेव गतिर्नान्यो गुरुरेवावलम्बनम् ॥२॥

संसारः—मिथ्याज्ञान-जन्य-वासना। इति नैयायिकाः॥ स्वादृष्टोपनिबद्धशरीरपरिग्रहः। इति कलाप-टीकायां गोपीनाथः॥ संसरणम्। इति शब्द-रत्नावली॥ संसरन्त्यत्र संसारः॥ जगत्॥ Worldly illusion The course of worldly life Mundane existence. Transmigration. Succession of births. The world. [Cf. असारः संसारः। परिवर्त्तिनि संसारे। संसार-त्यागी। संसार-धर्मः। संसार-बन्धनम्। संसार-लीला। संसार-वासना। संसार-समुद्रः। संसार-स्रोतः। संसाराश्रमः। संसारासक्तः। संसारी॥]

आत्यन्तिकः—(१) अतिशयितः। ऐकान्तिकः॥ (२) अविच्छिन्नः।

अञ्जनम्—[अन्ज् (दीप्तौ) + अन् (करणे)] नेत्र-दीप्ति-वर्द्धक-कज्जलम्। अस्य गुणौ—तारा-नैर्मल्य कारित्वम्। निर्मल-जलतुल्य-निराकुल-दृष्टिकारित्वञ्च। इति राज-वल्लभः॥

अनामयः—नीरोगः। सुस्थः।

सन्देह-तमसाच्छन्नम् अज्ञात-धर्म-तत्त्वकम्।
मुक्ति-मार्गे नयत्येव सदा स ज्ञान-वर्तिभिः॥५॥

नयति—परिचालयति। वर्त्तिः—[वृत् (दीप्तौ) + इ] दीपः।

शरीरं मानसं चित्तं गुरवे विनिवेद्य यः।
शिक्षते यो गुरोर्योगं शिष्य इत्यभिधीयते॥६॥

शिष्यः—[शास् (शासने) + क्यप्] शासन-योग्यः। उपदेश्यः।

श्रद्धैव कारणं मुख्यं शिष्यत्वाधिकृतिं प्रति।
गुणाः सर्वे भवन्त्येव श्रद्धायां सुप्रतिष्ठिताः॥७॥

मुख्यम्—[मुख + य] आद्यम्। श्रेष्ठम्।

बीज-मध्ये यथा वृक्षः सूक्ष्म-रूपेण तिष्ठति।
श्रद्धा-मध्ये गुणाः सर्वे तथा तिष्ठन्ति निश्चितम्॥८॥

अन्यथा निर्मला श्रद्धा सर्व-दोष-प्रमोचनी।
अविश्वासो महाविघ्नो वर्जनीयः प्रयत्नतः॥९॥

मुमुक्षुश्च महाबुद्धिर्महाशयः सदा शुचिः।
स्थैर्य-धैर्य-समापन्नो विश्वासी विनयान्वितः॥१०॥

एवम्विधं गुरुं प्राप्य श्रद्धा-पात्रं कृपामयम् ।
दीक्षार्थं तं समुद्गच्छेद् उपायन-समन्वितः ॥१६॥

उपायनम्—[उप (समीपे)+इ (गमने)+अनट् (कर्मणि)] उपढौकन-द्रव्यम् । "रिक्त हस्तो न पश्येत राजानं देवतां गुरुम् ॥" "तद् विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्-पाणिः श्रोत्रियं ब्रह्म-निष्ठम् ॥" इति मुण्डके ॥

भक्त्या विनय-सम्पन्नः प्रणमेद् दण्डवत् क्षितौ ।
अर्चयित्वा तं गुरुं सम्यक् प्रेम-पुष्पैः स्तवैः स्तुयात् ॥१७॥—

अर्चयित्वा—अर्चयित्वा ।

"नमामि श्रीगुरुं नित्यं विद्वत्-कुल-विभूषणम् ।
योगैश्वर्य-सुसम्पन्नं योगानन्द-प्रदायिनम् ॥१८॥
नमामि त्वां महीयांसं पूर्ण-विज्ञान-विग्रहम् ।
परमानन्द-पाथोधिं दुःख-ताप-निवारणम् ॥१९॥
नमामि त्वां दया-सिन्धुं नमामि विश्व-पावनम् ।
त्वामेव परमं ब्रह्म संसारार्णव-शोषणम् ॥२०॥
त्राहि मां त्राहि मां देव मोह-सागर-मध्यतः ।
ताप-त्रय-परित्राणं त्राहि मामार्त-वत्सल ॥२१॥
अज्ञान-तिमिराच्छन्नं कृपा-दीपेन भास्वता ।
नाथ मे योग-पन्थानं मोक्ष-मार्गं प्रदर्शय ॥२२॥

ददाति च ॥" इति कुलार्णव-तन्त्रे ॥ "गुरुं तत्त्वं देवताञ्च
...त्वम् सर्वं प्रजेत् ।" इति बृहद्धर्म-पुराणे ॥
मोहः — "मोह-क्षयाद् यत्नाभोगात्, (आभोगः—
...विस्तारः) सहज-विद्या-जय. ॥" इति शिवसूत्रम् ॥ "यदा
...क्षोभः (देहादिषु अहं प्रत्यय-रूपः) प्रक्षीयेत तदा स्यात् परमं
पदम् ॥" इति स्पन्द-कारिकायाम् ॥
तिमिरम् अन्धकार । (स अधकमकः, मोह दायकः,
...भ्रम-जनक., पाप वर्धकः, क्लान्ति जनकश्च ।)
...—पामय । नरक.— कष्ट-जनक-स्थानम् । दुःख-भोग-
...नम् । निरयः ॥ दुःख-प्राप्तिः । दुर्गतिः ।

एवं श्रुत्वा गुरोरग्रे तिष्ठेत् बद्धाञ्जलिः पुमान् ।
गृह्णाति तं गुणोपेतं शिष्यत्वे श्रीगुरूत्तमः ॥२७॥

"तस्मै स विद्वान् उपसन्नाय सम्यक् प्रशान्त-चित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तं तत्त्वतो ब्रह्मविद्याम् ॥" इति मुण्डके ॥

ततस्तं गुण-सम्पन्नं शिष्यं भावे स्थितो गुरुः ।
दीक्षेत च यथाकालं शक्ति-पातादि-कर्मणा ॥२८॥

दीक्षेत — दीक्षां ददाति ॥ दीक्षा = मोक्षमार्ग-प्रदेश-द्वार. । शक्ति-पात.—अनुग्राहक-शक्ति-संपातः (यदनुविद्ध-हृदया जन्तो विधिकोन्मुखतामिति) ।

शान्ति-पात्रो भवेन्नित्यम् सत्याभिध्यान-दायकः ।
शान्ति-पात्रो भवेन्नित्यं महाभाग्यानि-भाजकः ॥१४॥
शान्ति-पात्रो भवेन्नित्यं प्रेम-भक्ति विवर्धकः ।
मन्येयं सद्गुणा दीक्षा लभ्यतेऽपि प्रयत्नतः ॥१५॥

शान्तिः—पीडा । मनोव्यथा । दुःखम् ।

प्रेम-भक्तिः—उत्तमा भक्तिः । श्रीकृष्ण-भगवद्विषये ऐकान्तिक-ममता । उत्तमा भक्ति त्रिधा । यथा । "सा भक्तिः—साधनं भावः प्रेमा चेति त्रिधोदिता ।" (१) साधन-भक्ति यथा कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा । नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता । (२) भाव भक्ति यथा । शुद्ध-सत्त्व-विशेषात्मा प्रेम-सूर्यांशु-साम्य-भाक् । रुचिभिश्चित्त मासृण्यकृदसौ भाव उच्यते ॥ (३) प्रेम-भक्ति यथा । सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः । भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥ इति भक्तिरसामृत-सिन्धौ पूर्व विभागः ॥ सद्गुणा—सद्गुणमयी ।

यद्यप्येषा शुभा दीक्षा महाशक्ति प्रदायिका ।
फलदा सा भवेन्नैव सुयोग्यं पौरुषं विना ॥१६॥

दीक्षा लब्ध्वा सदा शिष्यः प्रयत्नेन सदोद्यमः ।
कुर्वीत सततं योगम् अन्यथाऽरण्य-रोदनम् ॥१७॥

अरण्य-रोदनम्—आत्मोपायकारक-योगशून्यं निष्फलं रोद-

सप्तमोल्लासः ।

प्रबोधस्य महाविष्णो रैवतं सुसमाधिना ।
ब्रह्म-भावे स्थिरत्वात्तं योगं प्राहु र्मनीषिणः ॥१॥

समाधिः — 'पवनाङ्ग'स्य दशमांशाधे ११-१४ श्लोकौ द्रष्टव्यौ । तथा च । 'धीरे मनः समाविश्य तिष्ठेदपि च सुस्थिरम् । निर्वातानलवद् योगी समाधिस्थः प्रगीयते ॥ न शृणोति न चाघ्राति न स्पृशति न पश्यति । न च सुखं विजानाति न संकल्पयते मनः ॥ न चाभिमन्यते किञ्चिद् न च बुध्यति काष्ठवत् । एवं शिवे विलीनात्मा समाधिस्थ इहो-च्यते ॥" इति शिव पुराणे ॥

कोमला ध्यानादि मार्गे ध्येये दृष्टेऽति परात्परे ।
धैर्यस्य दर्शनं सम्यग् योगं प्राहु र्मुनीश्वराः ॥२॥

जीवस्य ब्रह्मणा सार्धम् ऐक्यस्य ज्ञान मुत्तमम् ।
ब्रह्म-समाधि-गम्यस्य योग माहु र्महर्षयः ॥३॥

परः—पूर्वरूपेण मल-चाञ्चल्य-विरहितः ।

सर्वोप्यं परमाद्वैतं समाधि-ज्ञान-मेवतः ।
द्वैत-हीनं यदा दृष्टं योगयाधिगत स्तदा ॥४॥

एवं सत्यतमं ज्ञानं परमेव समाधिना ।
योगमाहुश्च योगा हि तस्योपायाः सदातनाः ॥५॥

सदातनाः—सनातनाः । "योगेन साधयेद् योगम् ।"

पूर्वाङ्गः—कामभोगाः ।

विश्वे ताप-मयं दृष्ट्वा पूर्णानन्दं परेश्वरे ।
ज्ञान-वैराग्य-संयुक्तः सर्वं विश्वं परित्यजेत् ॥१२॥

भास्वराणि समस्तानि विश्वानि क्षणिकानि च ।
दुःखमयानि सर्वाणि तान्यञ्जसा परित्यजेत् ॥१३॥

क्षणिकानि—कल्पना-प्रसूतानि । काल्पनिकानि । भयदा-यीनि । अञ्जसा—शीघ्रम् । द्रुतम् ।

दर्शयन्ति खेद-जालेन सुखं चेतो हि सन्ततः ।
संसार-कारणं मोहं दुःखामयं परित्यजेत् ॥१४॥

जालम्—[जल् (आच्छादने)+ण] सूत्रादि-निर्मित-मत्स्यादि-धारणोपायः ॥

क्षुत्-पिपासा-जरा-व्याधि-संयुताय विनाशिने ।
अशुद्धाय शरीराय योगं नैव परित्यजेत् ॥१५॥

जरा—वयःकृत-चर्ममांसाद्यवस्थाभेदः ।
शरीरम्—[शॄ (वधे, नाशे)+ईरन् (कर्मणि)] शीर्यते रोगादिना यत् तत् । प्रतिक्षणं क्षीयमाणो देहः ।

विषयान् सम्परित्यज्य निस्पृहो निष्परिग्रहः ।
योगं समभ्यसेद् दोष-शोधनाय शिवाय च ॥१६॥

योग-योग्यत्व-सिद्ध्यर्थं वैराग्येण प्रयोजनम् ।
वैराग्याय विशुद्धाय सदाचारैः प्रयोजनम् ॥१७॥

अयं क्रोधो महोद्वेगः—सर्वं कामात् प्रवर्तते।
कामाग्निं शमयेत् तस्मात् संयमामल-वारिणा ॥२५॥
सर्वान् कामान् परित्यज्य अप्रमत्तस्तु यो नरः।
सात्त्विकेनैव कामेन राजसं तामसं जयेत् ॥२६॥

सात्त्विकः—सत्त्व-गुणोद्भवः। [सतः साधो भावः सत्त्वं; प्रकाशकं ज्ञानं, सुख हेतुः]। राजसः — रजोगुणोद्भवः। [रजः—रागात्मकं, दुःख हेतु]। तामसः—तमोगुणोद्भवः। [ताम्यति ग्लानिं प्राप्नोति अनेनेति तमः; आवरकं, मोह-हेतुः]। सत्त्वगुणान्वितस्य मनसो गुणाः—(१) आस्तिक्यं, (२) सदसद्-विवेचना-पूर्वकं भोजनम्, (३) अक्रोधः, (४) सत्य-निष्ठा, (५) मेधा, (६) बुद्धिः, (७) धृतिः, (८) क्षमा, (९) करुणा, (१०) आत्म ज्ञानं, (११) शास्त्राभ्यासः, (१२) अनिन्दितं कर्म, (१३) निष्कामत्वं, (१४) विनयः, (१५) धर्म-परायणता। रजोगुणान्वितस्य मनसो गुणाः—(१) क्रोधः (२) ताड़न-शीलता, (३) अत्यन्तं दुःखम्, (४) अत्यन्त-सुखेच्छा, (५) कपटता, (६) कामुकता (७) मिथ्या-वादित्वम्, (८) अधीरता, (९) अहङ्कारः, (१०) ऐश्वर्याद् अभिमानिता, (११) अनियन्त्रितानन्दः, (१२) अधिक-भ्रमणम्। तमोगुणान्वितस्य मनसो गुणाः — (१) नास्तिकता, (२) अत्यन्त-विषण्णता, (३) आलस्यं, (४) दुष्ट-बुद्धिः, (५) निन्दित कर्मणि प्रीतिः, (६) अत्यन्त-निद्रालुता, (७) सर्वथा अज्ञानता, (८) सर्वदा क्रोधान्धता, (९) मूर्खता।

पूर्वाङ्कः—सप्तमोल्लासः ।

इच्छा-शक्ति प्रभावेण सत्यं सदैव धारयेत् ।
इच्छा-शक्ति-प्रभावेण संसार-सागरं तरेत् ॥१२॥

इच्छादेव्यां दृढां कुर्वन् भक्तिश्रद्धां वर्धयन् सदा ।
संसेवेत सदाचारं संयमादि-समन्वितम् ॥१३॥

अष्टमोल्लासः ।

सर्व-कर्म-विनिर्मुक्तो निषेध-विधि वर्जितः ।
भवेत् त्रिगुणातीत. संनियच्छामि मामहम् ॥१॥

संनियच्छामि—नियमाधीनं करोमि । Restrain

नित्यं नियम मास्थाय तपत्येव गभस्तिमान् ।
नित्यं नियम मास्थाय भ्रमत्येव कलानिधिः ॥२॥
नित्यं नियम मास्थाय घूर्णते भव-चक्रकम् ।
नित्यं नियम मास्थाय जीवनं चालयाम्यहम् ॥३॥

आस्थाय—अवलम्ब्य । गभस्तिमान्—सूर्यः ।
कलानिधिः—चन्द्रः ।

उच्छृङ्खलः प्रमत्तात्मा तृष्णयाऽऽकुलितेन्द्रियः ।
स्व-दुर्बुद्धि भ्रमान्धश्च दम्भ-दर्पादि-योगतः ॥४॥
ममता-पाश-सम्बद्धः सर्वदा भोग-लोलुपः ।
मरणान्मरणं याति दुःखाद् दुःखं सुदारुणम् ॥५॥

स्वदोष-त्यागतो विश्वं सेवितुञ्च न कः क्षमः।
किञ्चिदल्पं धनं दातुं दरिद्रोऽपि ध्रुवं क्षमः ॥२१॥

कोऽर्थो वित्तेन सर्वेण कोऽर्थश्च जीवितेन वा।
यदि नो तोष्यते ब्रह्म सर्वात्मा विश्व-सेवया ॥२२॥

इन्द्रिय-सेवनं ह्येवं कुक्कुटस्यापि वर्तते।
जीविष्यामि परार्थाय सर्वदा दान-तत्परः ॥२३॥

स्वार्थ-बुद्धिं हनिष्यामि मनो दाने निवेशयन्।
दुःखस्यान्तं गमिष्यामि मद्वरं परिचिन्तयन् ॥२४॥

सर्वदा पीडयिष्यामि राग-द्वेषादि-राक्षसान्।
आदरेण वरिष्यामि गुणान् सर्वान् सदाऽमलान् ॥२५॥

सत्त्वेन राजसं दोषं संवीक्ष्य रजसा तमम्।
सदाऽऽत्मानं पविष्यामि त्यक्त्वा वैषयिकं सुखम् ॥२६॥
पविष्यामि—पवित्रं करिष्यामि।

ज्ञानतोऽज्ञानतो वाऽपि नरैर्यत् पातकं कृतम्।
अवश्यमेव भोक्तव्यं फलं तस्य सुदारुणम् ॥२७॥

अतएव सदैवाहं गुरूपदिष्ट-मार्गतः।
चरिष्यामि सदाचारं भक्ति-वैराग्य-बृंहितम् ॥२८॥
बृंहितम्—वर्धितम्। पुष्टम्।
"दृढयत्नेन सदा कार्यं आचार-परिपालनम्।" "यज्ञ-दान-

पूर्वाङ्गः—अष्टमोल्लासः।

दैनिक-कार्याणि समाचरेत्। ततो भोजनावसाने परमेश्वरं ध्यायन् शय्यां गच्छेत्। पुनरुपयुक्त-काले जागृयात्। अहन्य-हनि एवं कुर्यात्। धर्मोत्सवान्, पुत्र-जनक-व्रतानि तथा सर्वाणि नित्य-नैमित्तिक-कृत्यानि यथा-शास्त्रं समाचरेत्। तीर्थ-यात्रां गच्छेत्। सज्जनं तथा सद्ब्राह्मणं श्रद्धया सेवेत। पोष्यवर्गं प्रतिपालयेत्। सन्तानं तथा आश्रितांश्च विद्यामभ्यासयेत्, शौचाचारांश्च शिक्षयेत्। दानेन, विश्व-सेवया च स्वार्थ-बुद्धिं हन्यात्। सर्वत्र शिवं पश्येत्। शिवे निर्भरतां कृत्वा तत्-प्रीत्यर्थं सर्वाणि कर्तव्यानि यथाकाले यथाशास्त्रं सुचारु-रूपेण समाचरेत्। सर्वदा संयतो भूत्वा कर्म-फलानि ईश्वराय विनि-वेद्य आश्रम-धर्मान् पालयेत्; अधिकारानुसारेण योगाभ्यासञ्च कुर्यात्। एवं सदाचारं प्रतिपाल्य योगि-जीवनं प्राप्य साधन-चतुष्टय-सम्पन्नः सन् सर्व-स्वामिनः शिव-कृपया शिवं परिज्ञाय शिवो भवेत्॥

त्वमेव कालिका श्यामा मुण्डमाला विभूषणा
शवारूढा शिव खड्ग रराभाति करालवक्त्रा ॥८

त्वमेव गोकुलानन्दी गोपालो नन्द बालक
राधाधिष्ठात्-देवश्च गोविन्द श्याम सुन्दर ॥९॥

त्वमेव श्रीमहादेव पञ्चानन त्रिलोचन
व्योमकेश उमा-कान्तो भूत नाथो वृषध्वज ॥१०॥

त्वमेव श्रीमहाविष्णु लक्ष्मी कान्तो जनार्दन
शङ्ख-चक्र-गदा-धारी पीताम्बरी मनोरम ॥११॥

त्वमेव कुण्डलीनी माता शब्द-ब्रह्म स्वरूपिणी
योगेश्वरो महादेवो निर्वाण-पद-दायिनी ॥१२॥

त्वमेव यन्त्र-रूपश्च सर्वाभीष्ट-प्रदायक ॥
सर्व -विद्या-मयो मन्त्रो मूलाऽविद्या-निवर्तक ॥१३॥

त्वमेव स्पर्शनो व्योम वरुणश्च हुताशन: ।
त्वमेव दानवो देव चन्द्रमा लोक-लोचन: ॥१४॥

त्वमेव सागरा शैला: पशु-पक्षि-नरादय ।
त्वमेव जागरा निद्रा क्षुत् पिपासा क्षमा धृति: ॥१५॥

वह्नौ त्वं दाहिका शक्ति: शोभा-शक्तिश्च चन्द्रिरे ।
पारिकाङ्क्षिणि योग स्त्वं मोक्ष: सांसारिकस्य च ॥१६॥

त्वमेव देश-कालौ च पुण्यापुण्यं शिवाशिवम् ।
त्वमेव सर्व-कर्ता हि त्वमेव सर्व-कारणम् ॥१७॥

सन्ध्याङ्ग'—प्रथमोऽंशम् ।

ऋषि—ऋषति (गच्छति) ज्ञानेन संसार पारम्, यः सः आत्मद्रष्टाचार्यः । मन्त्र यथा । "ऋषयो मन्त्र-द्रष्टारः ।"

ततो ध्यायेद्—"अहं ज्योति परब्रह्मोऽहं सनातनः ।
परमात्मा निराकारो नित्य-मुक्त स्वभाववान् ॥ ३७ ॥
नाहं देहो न मे मृत्यु न मे दुःख कदाचन ।
सच्चिदानन्द रूपोऽहं कैवल्य सुनिर्मलः ॥" ३८ ॥

विभाव्यैवं मम शान्तो विशोकश्च भवेन्नरः ।
संमार्जित-मनो वाञ्छेत् सर्वेषां मङ्गलं परम् ॥ ३९ ॥

अनन्तरं समुत्थाय मङ्गले भास्वरात्मना ।
उच्चारयन् महेशस्य पुण्यं नाम पुनः पुनः ॥ ४० ॥

योग्य स्थाने ततः कुर्याद् विण्मूत्रस्य विसर्जनम् ।
सम्यासे ब्रह्म-रात्रे हि वेगोत्सर्गः सुमङ्गलः ॥ ४१ ॥

ब्रह्म-रात्र—ब्राह्म-मुहूर्तः । सूर्योदयात् प्राग् अर्धप्रहरे द्वौ मुहूर्तौ । तत्राद्यो ब्राह्मः द्वितीयो रौद्रः ॥ [मुहूर्तः = द्वादश-क्षण-परिमित-कालः । दण्ड-द्वयम् ।]

वेग—मूत्र-विष्ठादि-निर्गम-प्रवृत्तिः । "आयुष्य मुषसि प्रोक्तं मलादीनां विसर्जनम् । तदन्त्र-कूजनाध्मानोदर-गौरव-वारणम् ॥" ["स्वभावतः प्रवृत्तानां मलादीनां जिजीविषुः । न वेगान् धारयेद् धीरः, कामादीनाञ्च धारयेत् ॥"]

सन्तरं पुनः पुनः गण्डूषं कुर्वीत । गण्डूषं—कफ-दन्त्रा-मल-हरं, मुखाम्भः-शुद्धि-कारकञ्च ॥ दुर्बलः, अजीर्ण-भुक्त, हिक्का-मूर्च्छा-मदान्वितः, दन्त-जिह्वा-रोगी दन्त-काष्ठं वर्जयेत् ॥ [दन्ता-मूर्ध्व-मधश्च घृष्ट्वा प्रान्त भित्तिं च शोधयेत् । शौच-पूर्ण-सुख स्नानं हरिराय प्रमोदति ॥]

अरुणोदय—[अरुणस्यार्कस्य तत् किरणस्योदयो यत्र ।] सूर्योदयात् पूर्वं मुहूर्तद्वय-कालः । "उदयात् प्राक् चतस्रस्तु नाडिका (=दण्ड) अरुणोदयः । अत्र स्नानं प्रशस्तं स्यात् तद्धि पुण्यतमं स्मृतम् ॥" इति स्कन्द पुराणम् ॥

स्नानं हि पावनं नृणां स्नानं हि पावनं महत् ।
मल-प्रक्षालनेनैव स्नानं पुनाति मानवान् ॥ ४४ ॥

स्नानं मनो-मल-त्यागस्तं विना ना न शुध्यति ।
मनश्च शुद्धये देहं जले पुण्ये विशोधयेत् ॥ ४५ ॥

तं विना—मनोमल-त्यागेन विना ॥ ना—मानवः ।

बहु-छिद्रान्वितो देहः स्रवत्यन्तर्मलान् सदा ।
तिष्ठत्येव दिवा-रात्रं बाह्य-मलैश्च दूषितः ॥ ४६ ॥

शरीरं गात्र-मार्जन्या मार्जयित्वा पुनः पुनः ।
शुद्धाम्बु-मज्जन-स्नानात् कुर्याद् देह-विशोधनम् ॥ ४७ ॥

गात्रमार्जनी—शरीर-मार्जनार्थं वस्त्रम् ।

प्रत्याङ्ग—प्रत्येकाङ्ग ।

वाक् रूपा या मयाप्रोक्ता वाग् ब्रह्माणं सरस्वती ।
मातृका सर्वतो देवी सर्ववर्णात्मना मयम् ॥ ६२ ॥

सविता- "सर्वं लोकं प्रसवनात् सविता स तु कीर्त्यते ॥"
सावित्री — सवितृ + अ (सावित्र = सविता । + ईप्]

गायत्री पावनी ज्ञात्वा ज्ञात्वा यान्ति परां गतिम् ।
न गायत्र्याः विशिष्टस्य अद् ब्रह्म परं च ॥ ६३ ॥

उपनीतो यथा शास्त्रं भूत्वा नित्यं क्रियान्वितः ।
संध्यां कुर्यात् जपेद् भक्त्या गायत्रीं वेद-मातरम् ॥६४॥

उपनयनम् — उप । गुरु समीपे—वेद-समीपे । नीयते इति उपनयनम् । ["उपनीय गुरुः शिष्यं महाव्याहृति-पूर्वकम् । वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥" इति याज्ञवल्क्यः ।] ब्राह्मण क्षत्रिय वैश्यानां यज्ञ सूत्र-धारणादि-रूप-संस्कारः ॥ ब्राह्मणस्य गर्भावधि षोडश-वर्ष-पर्यन्तम् । तत्र गर्भाष्टम वर्षो मुख्यः ॥ क्षत्रियस्य द्वाविंशति-वर्ष-पर्यन्तम् । तत्र एकादश-वर्षो मुख्यः ॥ वैश्यस्य चतुर्विंशति-वर्ष-पर्यन्तम् । तत्र द्वादश-वर्षो मुख्यः ॥ इति स्मृतिः ॥

प्रातः मध्यन्दिने सायं, स्नानं कृत्वा, शुचिः पुमान् ।
नित्यं सन्ध्यां प्रकुर्वीत भूत-शुद्धिं समाश्रितः ॥६५॥

मध्यन्दिने—मध्याह्ने ॥ सायं—दिनान्ते । सायं-काले । भूतशुद्धिः—भूतानां देहारम्भक-पृथिव्यादीनां शुद्धि भावना-

विशेषात् शोधनम् ॥ प्रण ज्योति—२।४।२०—२५ श्लोका द्रष्टव्या ।]

अरूपा भाव्यते सन्ध्या चतुर्थ. सा परा स्मृता
शिव बोधात्मिका सन्ध्या परमा सा समाधिजा ॥ २२

प्रात सन्ध्या समाप्याथ कुर्या त्वा तिलकं शुभम्
अतःपर समाचम्य जुहुया ज्ञात रदमन ॥ २३

तिलकम् = चन्दनादिना ललाटाद्यङ्गेषु मन चिह्नविशेष "गङ्गामृत् तुलसी मूल-मृत्तिका मल [illegible] माधीश्वरण संलग्न रजो मृद् गोष्पदस्थ च [illegible] यमुनमद गोधा चन्दन तीर्थ मृत्तिका । कुङ्कुम तुलसी [illegible] [illegible] मृत्तिका ॥ गोरोचना च कस्तुरी श्वेताद्यागुरु [illegible] [illegible] मृत्तिका गन्ध पद्मक हरि चन्दनम् गन्ध [illegible] [illegible] यमुना तीर मृत्तिका । गुरु पाद रजो [illegible] [illegible] रजो स्मृतिः ॥ कृत्वा प्रतिदिन स्नान से [illegible] गन्ध [illegible] [illegible] यत् तिलकं धार्य्य सदा [illegible] [illegible] [illegible] [illegible] मरन-तुलसी-भव-काष्ठमाला ये द्वादशाङ्गे हरि नाम कृता [illegible] पुण्ड्रा । ये लग्न-भक्ति-सुदृढा [illegible] गङ्ग-चक्रा [illegible] [illegible] ॥ भुवनमाग [illegible] [illegible] ॥ [illegible] ऊर्ध्वं पुण्ड्रं सदा कुर्यात् त्रिपुण्ड्र भस्मना [illegible] [illegible] चन्दनेन [illegible] मृत्तिका-[illegible] [illegible] भस्मना [illegible]

[illegible] । [illegible] কার্য্যসিদ্ধি [illegible] । [illegible] দুর্লভ [illegible] । [illegible] দীর্ঘসূত্রী, [illegible] [illegible] [illegible] । ''যদি [illegible] [illegible] । [illegible] [illegible] ।

বিলম্বাৎ কিং ন সর্বাণি কার্য্যাণি সিধ্যন্তি সাধকম্।
[illegible] পুনঃ পুনঃ ॥ ৩৬ ॥

অপায় — বিঘ্ন। Risk, danger.

সন্ দুর্য্যোগ বিচারেণ কার্য্যাণি কুরু নির্ণয়ম্।
বিচারেণ বিনা কার্য্যং ন সিধ্যতি কদাচন ॥ ৩৭ ॥

কর্মাণি কাল কর্মাণি যথা কালে সমাচরেৎ।
একস্তু সেবনং কার্য্যে শতধা রক্ষতি ধ্রুবম্ ॥ ৩৮ ॥

কর্ম —ক্রিয়া। তৎ ত্রিবিধম্, নিত্য-নৈমিত্তিক কাম্য-প্রায়শ্চিত্ত [illegible] । [illegible] । একস্তু সেবনং কার্য্যে — "One stitch in time saves nine."

আমুষ্মিং কাল সমাপ্তি, মুক্তি [illegible] লভ্যতি।
[illegible] সুজন স্ব-কর্মণা ॥ ৩৯ ॥

ঘ

प्राणान [illegible] सहा मनाम
[illegible] कृपणन ॥१२॥
नहन कृपण ।

[illegible] न प्रयान्ति [illegible]
वित्त [illegible] मया [illegible] कृपणा जन ॥१३॥

सदा [illegible] क्षुद्राणा क्षुद्र चेतसाम
जनाना मन्दभाग्याणा नास्ति [illegible] दया क्षणम॥१४॥
क्षुद्र—कृपण अधम । क्रूर । अल्प ।

विश्वस्य क्रन्दन तेषा कर्ण कर्ण श्रृणोति नो ।
विश्वस्य रोदन तेषाम् चक्षु नेत्र न पश्यति ॥१५॥
कर्ण:—बधिर: ॥ रोदनम्—अश्रु ।

मनुष्यत्व-विहीना स्ते सञ्चये बद्ध-दृष्टना
सुखं शान्तिं मन-स्थैर्यं लभन्ते न कदाचन॥१६॥

कार्पण्येन शिव-द्वारं माऽवरुन्ध्याद् विमूढ धी ।
उन्मत्तां विभवाकाङ्क्षां त्यक्त्वोत्तिष्ठेत मुक्तये ॥१७॥
उन्मत्त:—[उन्माद-युक्त: । वायुकृत-चित्तविभ्रम विशिष्ट
उन्माद—वातिक-रोग-विशेष: । चित्त-विभ्रम: । मति-भ्रंश
"विरुद्ध-दुष्टाशुचि-भोजनानि प्रधर्षणं देव-गुरु-द्विजानाम् । उन्माद

त्याग एव परो धर्म स्त्याग एव परं तपः ।
त्याग एव परा शान्ति स्त्यागेऽभयं प्रतिष्ठितम् ॥२१॥

त्याग—"त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ।" इति श्रुतिः ॥

अभयम्—[भयम्—"राग विषयस्य विनाशके समुपस्थिते तन्निवारणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मक चित्त-वृत्ति-विशेषो भयम् ।" इति गीतायां द्वितीयाध्याये मधुसूदन सरस्वती ॥ "परत स्वानिष्ट-सम्भावना भयम् ।"]

त्यजेदात्म-सुखाकाङ्क्षाम् इच्छेत् सौख्यं परस्य तु ।
पर-दुःख-विनाशाय स्व-सुखानि त्यजेद् बुधः ॥२२॥

दधीचेन पुरा दत्तं जीवितं देव-सिद्धया ।
स्व-मांसं शिबिना दत्तं कपोत-रक्षणेच्छया ॥२३॥

दधीच—दधीचि मुनि ।

शास्य-सिद्धौ ददौ प्राणान् पश्चाद्दोमत्र-कातरः ।
पाम पुत्र ददौ पान्ना राज भक्ति-परायणा ॥२४॥

पादोमत्र—क्रोश ।

पान्ना—मिवाराधिपति-उदयसिंहस्य धात्री ।

आत्मोन्नत पराशंय मौन मार्गः सनातनः ।
सेवेत सक्रम विश्व माणैः कण्ठ-गतैरपि ॥२५॥

[illegible] ।

[illegible] सदा [illegible] ।
[illegible] ॥३६॥
[illegible] , [illegible] । [illegible] ।

[illegible] मनोचर: ।
[illegible] सर्वदा ॥३७॥

[illegible] ज्ञान-दुर्बला ।
अचिन्त्यं [illegible] तं [illegible] परम् ॥३८॥

[illegible] प्रेम्णा चोत्फुल्ल-मानस: ।
[illegible] ब्रह्मणि सर्वत्र ब्रह्मैव परिभावयेत् ॥३९॥

देहं गेहं धनं कर्म पुत्रं मित्रं यशो धनम् ।
सर्वमेतद् विजानीयात् पूर्णस्य परमात्मन: ॥४०॥

प्रीणयेत् तस्य देवस्य सदा समत्व माश्रित: ।
"म· कुर्यात् कर्माण्यनासक्त: सन्तुष्टो ज्ञान-निश्चय: ॥४१॥

परमश्येति [illegible] निरहङ्कार: स्पृहा-क्रोध-विवर्जित: ।
सन्तोष-वजि [illegible] निराशस्थो जितेन्द्रिय: ॥४२॥
[illegible] हंस: सुखे दु:खे सदा सम: ।
य: स सन्तुष्ट इहो [illegible] प्रेमान्वित: प्रपूजयेत् ॥४३॥

सन्तोषं य [illegible] विभावयन् ।
[illegible] जायते दु: [illegible] कारणम् ॥४४॥

सर्वत्र प्रणमेद् भक्त्या नारायणमनामयम्।
कुर्यादैक्यं प्रयत्नेन सर्वदा सेवकेशयोः ॥ ४५ ॥

भाव-कर्म-गुण-द्रव्ये दृष्ट्वा विष्णुं जले स्थले।
विश्वरूपाम-रूपाणि चिदि चित्तं नियोजयेत् ॥ ४६ ॥

भगवद्ध्यानमानन्दी भव-भङ्ग-करं हरं।
धाम्मानं मौनयेन्नित्यं शङ्करे परमेश्वरे ॥ ४७ ॥

एवं कर्म-परो भूत्वा नित्ये ब्रह्मणि निष्ठितः।
सर्वोपाधि-विनिर्मुक्तो लभेत ब्रह्मणः पदम् ॥ ४८ ॥

"ईश्वरस्य जगत् सर्वं, सर्वमेव करोति सः।
नाहं कर्ता न मे किञ्चित्, तस्मै सर्वं समर्पितम् ॥ ४९ ॥
दाता दानं ग्रहीता च दत्तं दान-फलञ्च यत्।
सर्वाण्येव परं ब्रह्म"—सर्वदैवं विचिन्तयेत् ॥ ५० ॥

इदं ब्रह्मार्पणं पुण्यम् इदं ब्रह्मार्पणं परम्।
इदं ब्रह्मार्पणं कृत्वा मुच्यते कर्म-बन्धनात् ॥ ५१ ॥

एकमेव परं ब्रह्म सर्वरूपे सदा स्थितम् ।
सर्वथा सर्वदा नित्यं पूजयेत् तदनञ्जनम् ॥३६॥

अनञ्जनम्—दोष शून्यम् । निरञ्जनम् । परं ब्रह्म ।

गुणातीतो महाविष्णुः मनो वाचा मगोचरः ।
पूजां गृह्णाति सर्वथा विश्वरूपेण सर्वदा ॥३७॥

अहो भाग्यं अहो भाग्यं —नरोऽपि ज्ञान दुर्बलाः ।
धीमान् गङ्गाजलेन सम्यक् न प्रक्षाले परम् ॥३८॥

सर्वस्मिन् ब्रह्म पश्यन् प्रेम्णा चोत्फुल्ल मानसः ।
सः ब्रह्माणि सर्वं ब्रह्मैव परिभावयेत् ॥३९॥

देह गेह धन कलत्र पुत्र मित्रं यशो धनम् ।
सर्वमेतद् विजानीयात् पूर्णस्य परमात्मनः ॥४०॥

पापस्य तस्य दृश्यस्य सदा समत्व माश्रितः ।
कुर्यात् कर्माण्यनासक्त सन्तुष्टो ज्ञान-निश्चयः ॥४१॥

निर्ममो निरहङ्कारः तृष्णा-क्रोध-विवर्जितः ।
सत्र जिता विशालाक्ष निरालम्बो जितेन्द्रियः ॥४२॥

शुभ निन्दा स्तुति देवः सुखे दुःखे सदा समः ।
सर्व भूत स्थित विष्णु प्रेमाश्रित प्रपूजयेत् ॥४३॥

अष्टादि दल पद्मस्य मिशं माल्यं विभावयन् ।
देह भावं परित्यज्य भज त्वं सर्व कारणम् ॥४४॥

मध्याह्नः—द्वितीयोयामः ।

सर्वत्र प्रणमेद्‌ भक्त्या नारायणमनामयम् ।
कुर्यादेवं प्रयत्नेन सर्वदा सर्वकर्मणि ॥ ४५ ॥

नाम-कर्म-गुण-द्रव्ये दृष्ट्वा विष्णुं जले स्थले ।
विष्णोर्नाम-रूपाणि चिदि चित्तं नियोजयेत् ॥ ४६ ॥

भगवद्धामसमालम्बी भव-भङ्ग-करं हरं ।
आत्मानं मौनयेन्नित्यं शङ्करे परमेश्वरे ॥ ४७ ॥

एवं कर्म-परो भूत्वा नित्यं ब्रह्मणि निष्ठितः ।
सर्वोपाधि-विनिर्मुक्तो लभेत ब्रह्मणः पदम् ॥ ४८ ॥

"ईश्वरस्य जगत् सर्वं, सर्वमेव करोति सः ।
नाहं कर्ता न मे किञ्चित्, तस्मै सर्वं समर्पितम् ॥ ४९ ॥
दाता दानं ग्रहीता च दत्तं दान-फलञ्च यत् ।
सर्वाण्येव परं ब्रह्म"—सर्वदैवं विचिन्तयेत् ॥ ५० ॥

इदं ब्रह्मार्पणं पुण्यम् इदं ब्रह्मार्पणं परम् ।
इदं ब्रह्मार्पणं ज्ञात्वा मुच्यते कर्म-बन्धनात् ॥ ५१ ॥

मध्याह्नः—तृतीयोंऽशः ।

सेवेत पितरौ नित्यं नेत्र-गोचर-दैवतौ ।
मानसेन शरीरेण द्रविणेन मुदा गिरा ॥ ४ ॥

अभ्यासयेत् शुभां विद्यां सन्तानमाश्रितार्भकम् ।
उपनयेद् यथा-कालं यथा-शास्त्र मपत्यकम् ॥५॥
"माता वैरी पिता शत्रु, र्बालो येन न पाठितः ।"
अर्भकः—शिशुः ।

अपत्यम्—न पतन्ति पितरौ येन । पुत्र-दुहितृ-रूप-सन्तानम् ।

शिक्षयेच्च सदाचारं नीति-धर्म-समन्वितम् ।
पर्यवेक्षेत यत्नेन निरन्तर मपत्यकम् ॥ ६॥
नीति—morality. पर्यवेक्षेत—inspect.

आत्मनो मङ्गलार्थाय सन्तानोन्नति-हेतवे ।
ब्रह्मनिष्ठो भवेत् पुंस संयमी विजितेन्द्रियः ॥ ७॥

संयमो हि परो धर्मः संयमो हि परं तपः ।
पुण्यानामपि पुण्यञ्च संयमो हि महाव्रतम् ॥८॥

संयमो धारणा ध्यानं संयमो हि समाधयः ।
संयमः स वशो यस्य मुक्तिस्तस्य करे स्थिता ॥९॥
धारणा—ध्येय-वस्तुनि अन्तरिन्द्रिय-धारणम् ।
ध्यानम्—धारणा-विषये एक-प्रत्यय-सन्ततिः ।

भूत्वा पूजनीयं जनमभिनन्देत्। पूजनीयान् जनान् श्रद्धया अभिवादयेत्। पूज्येषु दण्डायमानेषु न उपविशेत्। अभक्ष्यं न भक्षयेत्। नग्नो भूत्वा न स्नायात्, न वा स्वप्यात्। ऊर्ध्वं, तिर्यक्, दूरं वा निरीक्षमाणो न पर्यटेत्। नेत्र-चपलो न भवेत्। असंवृत-मुखो न जृम्भेत्। रहस्यानि रोमाणि तथा इन्द्रियाणि न स्पृशेत्। दन्तैर्नख-लोमानि न छिन्द्यात्। जितेन्द्रियो भवेत्। मलत्याग-काले मुक्त-कच्छको भवेत्। मलत्यागान्ते जलेन शौचं कुर्यात्। दुष्ट-यानादिकं न आरोहेत्। देवता, सज्जनम्, आचार्यं, तथा अन्यान् पूज्यान् जनान् श्रद्धया सेवेत। यथाकालं सन्ध्यादिकानि समुदयानि कर्तव्यानि कुर्यात्। अपभाषां सर्वथैव वर्जयेत्। सर्वदा आचार्याधीनो भवेत्।॥

सेवां यः कुरुतेऽश्रान्तं सर्वदा श्रद्धयान्वितः।
आत्म-सौख्य-परित्यागी स एव संयतः पुमान्॥१५॥

अश्रान्तम्—श्रम-रहितम्। अनवरतम्।

यथाहारं मितं भुङ्क्ते सात्त्विकं स्वास्थ्य-रक्षकम्।
अलुब्धः शिव-सम्प्रीतेः स एव संयतः पुमान्॥१६॥

मितम्—परिमितम्।

ब्रूते सर्व-हितं सत्यं भाषते मधुरं मितम्।
विष्णु-सङ्कीर्तने सक्तः स एव संयतः पुमान्॥१७॥

एवं मंगल आलाप कार्यं कुर्याद् विचक्षणः।
यथा शीघ्रं हरिं शीघ्रं दयया परितोष्यतम् ॥२०॥

चतुर्थो यामः।

मध्याह्ने ज्वलित गृष्मे वसिता शुद्ध आसनम्।
सम्यक् कृत्वा सदा-ध्यानं कुर्यात् विष्टे देवताम् ॥१॥

मध्याह्नः—दिवा विभक्त दिनमध्यभाग। स च दशदण्डात् पर दश-दण्ड-पर्यन्त। इति स्मृत्यादः समरोदय॥

ज्वलितः—ज्वलन-धाम॥ वसिता—परिधाय।

मध्याह्न सन्ध्या—[मध्याह्न सन्ध्याया चतुर्थ-मुहूर्त कालमात्र व्याप्तिः॥ "पूर्वाह्ने सदा सन्ध्ये समध्ये प्रकीर्तिते। सम-मध्योऽपि मध्याह्ने मुहूर्त सप्तमीवरि॥" इति मौद्गल्यायन-वचनम्॥] पूर्वाह्ने एकादशी वा पूजां कुर्याद् यथाविधि।" इति हृदयम् पुराणे॥

पूज्यो हि सर्व-लोकानाम् अद्वितीयो महेश्वरः।
चिदानन्द-स्वरूपो यो नित्य पूर्णः परात्परः॥२॥

अनङ्गं परमं सूक्ष्मम् अनिर्देश्य सलक्षणम्।
कथं ध्यास्यामि मूढा त्वां स्वर-व्यञ्जन-वर्जितम्॥३॥

अनिर्देश्यम्—न निर्देश्यं जाति-गुण-क्रिया-संज्ञाभि निर्दिष्टम्

प्राणान्तः—जलाचमनः। [आचमनम्—वैध-कर्मारम्भात् पूर्वं मन्त्रेण-जलपानानन्तरं यथाक्रमात् अङ्ग-स्पर्शरूप-शुद्धिजनक-क्रिया।]

प्राणायाम—पूरक-कुम्भक-रेचक-रूप-योगाङ्ग-विशेषः। स द्विविधः, सगर्भो निर्गर्भश्च। "सगर्भो मन्त्र-जापेन निर्गर्भो मात्रया भवेत्।" "प्राणायामो मरुज्जयः।" "प्राणापान-निरोध स्तु प्राणायाम उदाहृतः।"

"सुधाने भूतशुद्ध्या च प्राणायामादिभि स्तथा। षडङ्गाद्य-विन्यासैः शास्त्रविहितैरिता ॥"

शरीर-स्थित-भूतानां यत् योगेन विशोधनम्।
भूत-शुद्धि स्तदेव स्यात् ज्ञान-दीप-प्रदीपनी ॥१७॥

प्रदीपनी—उद्दीपिका। प्रकाशिका। poker

हृत्पद्म-निलयं जीवं चैतन्य-ज्योतिरव्ययम्।
ध्यायेदादौ प्रयत्नेन प्रदीप-कलिका-निभम् ॥ १८ ॥
ध्यायेत् कुण्डलिनीं देवीं मूलाधार-निवासिनीम्।
कोटि-सौदामिनी-भासां सर्व-सौभाग्य-दायिनीम् ॥१९॥
कुण्डल्या सह जीवञ्च ब्रह्म-मार्गेण योगवित्।
शिरस्थे पुष्कर-स्थाने परमात्मनि योजयेत् ॥ २० ॥
ततो विभावयेत् तत्र मनसा मान्य-गामिना।
चतुर्विंशति-तत्त्वानि विलीनानि परात्मनि ॥ २१ ॥

साधकः—चतुर्दीक्षितः ।

कृत्वा न्यासादि-कर्माणि सार्धं दिष्ट-देवताम् ।
मनोयोग महाशेन परमाह्लाद पूर्वकम् ॥ २८ ॥

न्यासः—पूजा-जपादेः प्राक् विघ्ननाशमन्त्र सिद्ध्यर्थं देहावयवेषु वर्णादि विन्यासः । "आगमोक्तेन विधिना नित्यं न्यासं करोति यः । देवभावम् आप्नोति मन्त्र-सिद्धिः प्रजायते ॥ यो न्यास-कवचच्छन्नो मन्त्रं जपति तं प्रिये । विघ्ना दृष्ट्वा पलायन्ते सिंहं दृष्ट्वा यथा गजाः ॥" "अकृत्वा न्यास जालं यो मूढ़त्वात् प्रजपेन्मनुम् । सर्वं विघ्नं स बाध्यः स्याद् व्याघ्रैः मृगशिशुर्यथा ॥" "प्राणायामं अकृत्वा तु भूतशुद्धिं तथापि वा । अकृत्वा विधिवत् न्यासान् नार्चायां अधिकारवान् ॥" इति तन्त्रसारः ॥

मानसं मारुतं शक्तिं योजयेद् देवतात्मना ।
पौरुषेण प्रयत्नेन पूजादि-फल-हेतवे ॥ २९ ॥

मारुतम्—प्राण-पवनम् ॥ शक्तिम्—कुण्डलिनी-शक्तिम् ।

भाव-प्राप्तौ भवेशानो, भावेन तं भजेत् सदा ।
भावेन शुद्धतां याति क्रियाऽपि विधि-वर्जिता ॥ ३० ॥

भावः—"चित्त-वृत्ति-विशेषो भावः" । ईश्वरानुरागद्रवचित्त-वृत्तिः । "शुद्ध-सत्त्व विशेषात्मा प्रेम-सूर्यांशु-साम्यभाक् । रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥" इति भक्तिरसामृतसिन्धौ ॥

भवेशानः—जगदीश्वरः ।

मध्याह्न—मध्याह्नकाल।

विनिद्रकार्यमहृद्य प्रदोषं आश्रमादिषं। पूर्वाह्नव्यापकत्वे च संन्यासभिवादनम्॥ मुनौ हीन दिन रात्रि देवता निवेदनं सदा। यथाशक्त्या तदा विप्रो दर्शि शक्त्या प्रविशेल्लिना॥

अनन्य मनोयोग समन्वितो मनोविनयः।
पूजयेद् देवतां भक्त्या विदधैः उपचारकैः॥ ११॥

उपचार—पूजोपकरणम्।

आसनं स्वागतं पाद्यम् अर्घ्यम् आचमनीयकम्।
स्नानीयं मधु-पर्कं च वस्त्राद्याभरणानि च॥ १२॥
धूपं दीपं प्रसूनानि नैवेद्यं वन्दनं तथा।
गन्ध-स्नानञ्च ताम्बूलं पुष्पमाल्यं मनोहरम्॥ १३॥
यद् यदिष्टतमं लोके यच्चापि प्रियमात्मनः।
तत्तन्निवेदयेद् भक्त्या भगवत् प्रीति-हेतवे॥ १४॥

आसनम्—उपवेशनाधार। पीठादि।

पाद्यम्—पाद-प्रक्षालनार्थ-जलम्।

आचमनीयकम्—मुख-प्रक्षालनार्थ-जलम्।

मधुपर्कम्—[मधु + पृच् + घञ्] "दधि सर्पि र्जलं क्षौद्रं सिताभिस्तु पञ्चभिः। प्रोच्यते मधुपर्कस्तु सर्व-देवौघ-तुष्टये॥ अलाभेतु सर्वत्र क्षौद्रं सितादधिघृत समम्। सर्वेषामधिकं क्षौद्रं मधुपर्के प्रयोजयेत्॥"

धूप—गन्ध-द्रव्य विशेषोत्थधूमसार-पतित।

दीप-निर्वाण-विवरणम्—(१।८।११ श्लोक द्रष्टव्य)। सद्गुरु-प्रसादीय-दीक्षया सर्वं सुकृतम् कृत्वा संक्षिप्तंमतं समीतिको भगवत्सु ॥ ध्यानम्—ध्यानम् ।

षट्चक्राम्बुजेष्वेव यावद् ध्यानं प्रदायके ।
सर्वेन्द्रिय विषये पुष्टे सर्व-मार्गैः प्रसारिते ॥ ४२ ॥

एवं दृष्ट्वा प्रत्येकानि ब्रह्माण्डानि परात्परे ।
एकैकं प्रत्येकं तन्मयत्वेन चिन्तयेत् ॥ ४३ ॥

ध्यायेत् सती कृतार्थान् सर्वेष्ट-देवं मनोहरम् ।
ध्यानं हि चिन्तनं विष्णोः पावनं निश्चलं परम् ॥ ४४ ॥

सर्वेन्द्रिय-चाञ्चल्यं मनसा संनिरुध्य च ।
ध्यानं कुर्वीत देवस्य चिन्तनं ध्यानम् उच्यते ॥ ४५ ॥

ध्येयालम्बन-संस्थस्य ध्येय प्रत्यय-सन्ततिः ।
प्रत्ययान्तर-निर्मुक्ता सा ध्यानमिति भण्यते ॥ ४६ ॥

ध्येय-प्रत्यय सन्ततिः—ध्येयाकाराकारित-चित्तवृत्ति-प्रवाह ।

ध्येयस्य चिन्तनेनैव याति निश्चलतां मनः ।
ध्येये पदे समाविष्टा तद् ध्यानं परमं महत् ॥ ४७ ॥

पादतो मस्तकान्तञ्च सर्वाङ्गाणि यथा-क्रमम् ।
चिन्तयेत् शनकैः ज्ञानी ध्यायेत्तानि पृथक् पृथक् ॥ ४८ ॥

यद्‌गाद् [illegible] नदा म्यन्त
[illegible] ॥ ४८ ॥

शुभ चिह्न समायुक्त [illegible]
पश्येत् [illegible] । ५? ॥

शुभचिह्न समायुक्ते [illegible] चिह्नानि मया दृष्टानि तत् पदे । दक्षिण [illegible] चिह्नानि [illegible] च नव नारद ॥ ध्वजातपत्र कमल वज्राङ्कुश [illegible] स्वस्तिक चोर्ध्वरेखा चाष्ट कोण चक्रमेव च ॥ नवान्यानि [illegible] साम्प्रत [illegible] त्तम । चिह्नानि वामचरणे [illegible] च । इन्द्रचाप त्रिकोणञ्च कलसश्चार्धचन्द्रकम् । [illegible] गोष्पद जाम्बवं स्मृतम् ॥"

सर्व-लक्षण-सम्पूर्ण दिव्य-गन्धानुलेपनम् ।
पश्येत् सुकोमलं गात्रं सर्वालङ्कार भूषणम् ॥ ५२ ॥

सर्व-लक्षण-सम्पूर्णम्—"त्रि-विस्तीर्णं त्रि-गम्भीरं त्रि खर्वं सुमनोहरम् । पञ्च-दीर्घं पञ्च-सूक्ष्मं षट्-तुङ्गं सप्त रक्तिमा । त्रिपर्द लक्षणं ज्ञेयं वासुदेवस्य पार्वति ॥" त्रि-विस्तीर्णम्—(१) नाभिः, (२) कपोलौ, (३) वक्षःस्थलम् ॥ त्रि-गम्भीरम्—(१) नाभिः, (२) हस्त-तली, (३) नेत्रे ॥ त्रि-खर्वम्—(१) नखानि, (२) केशः, (३) अधरः ॥ पञ्च-दीर्घम्—(१) नेत्रे, (२)

करौ, (३) कूर्म नखं, (४) पादौ, (५) पाद-नखं ॥ पञ्च वाक्यम्—(१) ग्रीवा, (२) मण्डलेशः, (३) कर्ण, (४) हस्तः, (५) कुण्डलः ॥ षड्-सूक्ष्मम्—(१) नासा, (२) ग्रीवा, (३) स्कन्धः, (४) वक्षः, (५) उदरः, (६) कटिः ॥ सप्त रक्तिमा—(१) पाद नखं, (२) करन नखं, (३) नासिका, (४) अधरम्, (५) आस्यपुटद्वयं, (६) जिह्वा, (७) करौ ॥

ध्यायेत् ततः कृपा(ा)स्थानो नामानि करौ करौ ।
ततश्च मुकुटं ग्रीवां शिखासूत्र-करौ परम् ॥ ५२ ॥

प्रसन्नं वदनं ध्यायेत् स्मितयुक्तं मनोरमम् ।
पर्याप्त-दर्शनं कान्तं पूर्णेन्दु-सदृशं परम् ॥ ५३ ॥
पर्यायम्—कान्ति-पुञ्जकम् ।

पुनाति यत् कृपा(ा)लोकैः समस्तं भुवन-त्रयम् ।
महानन्दमयं ध्यायेत् सर्वाभीष्टप्रद-मोक्षणम् ॥ ५४ ॥

एवं ध्यात्वा ततो भूय एकदैव समाहितः ।
आपाद-मस्तकं रम्यं सर्वं देहं विचिन्तयेत् ॥ ५५ ॥

आनन्द-सिन्धु-संमग्नो रोमाञ्चित-कलेवरः ।
दृष्ट-देवं निरीक्षेत ज्योतिर्मयं मनोहरम् ॥ ५६ ॥

पावनं दर्शनं यस्य करोति जन्म-खण्डनम् ।
पश्येत् तं शोभनं नित्यं पुण्यं नित्य-कलेवरम् ॥ ५७ ॥

समाहितः—अधिकृत समर्थः साधकः।

जीवन्मुक्तिः—जीवतो यस्य निर्वृत्तिः। जीवतः पुरुषस्य कर्तृत्व-भोक्तृत्वाभिमान-सुखदुःखादिविशेष क्लेशादि रूपस्य चिर-निवृत्तिः।

एवं योगी महाध्याने सदा चित्तं नियोजयेत्।
ज्ञान-वैराग्य सम्पन्नः श्रद्दधानो यतेन्द्रियः ॥ ६३ ॥

तिष्ठन् गच्छन् निश्वसन् पश्यन् शृण्वन् वदन्नपि।
शुचिर्वाप्यशुचिर्वापि सदा ध्यायेन्महेश्वरम् ॥ ६४ ॥

ध्यान-काले समर्थो वा जपेन्मन्त्रं समाहितः।
जपेनैव परां शान्तिं सिद्धिं लभते नरः ॥ ६५ ॥

मन्त्रः—उपासनानुकूल वाक्यम्।

जपः—विधानेन मन्त्रोच्चारणम्। "न चंक्रमन् न विहसन् न पार्श्वमवलोकयन्। नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा॥ न पदा पादमाक्रम्य न चैव हि करौ कृतौ। नैवं विधं जपं कुर्यात् न च संश्रावयेज्जपम्॥" इति याज्ञवल्क्यः॥ जपकाले न भाषेत ...॥ "क्रोधं मोहं क्षुतं निद्रां निष्ठीवनं विजृम्भितम्। दर्शनं वनितानाञ्च वर्जयेज्जप-कर्मणि॥ नाभेरधश्च संस्पर्शं कर्मकाले विवर्जयेत्॥" "मनः संहृत्य विषयान्मन्त्रार्थ-गत-मानसः। न द्रुतं न विलम्बञ्च जपेन्मौक्तिक-पङ्क्तिवत्॥"

श्रीगुरोर्वदनायातो बीज-रूपः सनातनः ।
मननात् त्रायते मन्त्रः संसारात् पाप-नाशनः ॥ ६६ ॥

संस्मृत्य वाच्य-लक्ष्यार्थौ मन्त्र-संलग्न-मानसः ।
सर्वदैव जपेन्मन्त्रं परमानन्द-दायिनम् ॥ ६७ ॥

["वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।"]
[विष्णु-मन्त्रस्य वाच्यार्थः = शङ्ख-चक्र-गदा पद्म धारी पीताम्बर पुरुष-मूर्तिः । तस्य लक्ष्यार्थः = सर्वव्यापी सर्वाधार सर्वान्तर्वर्ती परमात्मा ।]

उच्चैर्जपादुपांशुश्च श्रेयानित्येव निश्चितम् ।
उपांशोर्मानसः श्रेयान् कर्तव्यो गुरु-सम्मतः ॥ ६८ ॥

"जिह्वौष्ठौ चालयेत् किञ्चिद् देवता-गत-मानसः । निज-श्रवण-योग्यः स्यादुपांशुः स जपः स्मृतः ॥" "धिया यदक्षर-श्रेणीं वर्ण-स्वर-पदात्मिकाम् । उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ॥" इति मन्त्रसारः ॥

शुचिर्वाप्यशुचिर्वापि सर्व-देशे च सर्वदा ।
मन्त्रैक-शरणो योगी मन्त्रमेव समभ्यसेत् ॥ ६९ ॥

मन्त्रः शब्दमयः स्थूलो विपक्षो बाह्य उच्यते ।
सूक्ष्मो ज्योतिर्मयो हार्दं चिन्मयः परो मतः ॥ ७० ॥

चिन्मया वहिनो यस्य: परम: परिवर्त्तितं ।
एवं ध्यात्वा स्वात्मानं प्राप्नोति परमां गतिम् ॥ ७१ ॥

चार्द:—हृद् गत: ॥ यस्य:—यो यस्य:—परमो यस्य: ।

अध्याप्तान्ति प्रभुर्वीन प्रार्थनं आप संयुतम् ।
प्रार्थनं तत्वैनैव स्वर्गं दान अपाहतम् ॥ ७२ ॥

अपाहतम्—अनाहतम् । अपमानितावस्थम् ।

श्रीमान्तो वरत्वं कुटुं यदनि न प्रजानति ।
मैवात्मु दापये विग्यम् आर्तबन्धुं दया निधिम् ॥७३॥

कुटुम्—सौदनम् ।

प्रार्थ्यं यस्य प्रभावेण समस्तमपि लभ्यते ।
यात्त्वैव दुर्लभं किञ्चिद् यदनेन न साध्यते ॥ ७४ ॥

यद् यदाकाङ्क्षितं लोके प्रार्थयेत महेश्वरम् ।
नान्य: कोऽपि मे दाता, तमेकं सर्वदाऽऽर्थयेत् ॥ ७५ ॥

न प्राणं प्रार्थितं यावत् तावद्धि प्रार्थनं चरेत् ।
सदा सान्त्व-सम्पन्न सन्तान-भावमाश्रित: ॥ ७६ ॥

सर्वेषां जन्म-दाता स पालनाय पिता महान् ।
अवश्यं तेन दातव्यं यद् यदिष्टतमं नृणाम् ॥ ७७ ॥

धन्यं सौम्यं शुभं पुण्यं प्रयाचेत परात्परम् ।
योग्य-कृत्यं न याचेत विश्व-राज विमूढ-धी: ॥७८॥

विमाहीपूर्णज ईशाय निर्गुणाय गुणात्मने ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ८७ ॥
वाङ्-ईशं निराधारं सायासीनं चिदात्मकम् ।
मायां गृह्य कथं ज्ञानं स्यामहं पारमेश्वरम् ॥ ८८ ॥
विश्वरूपो त्वम् धामो विश्वनाथाऽमृतो मम ।
मायाश्रम्या गुणी देहो पश्यामि त्वां कथं विभो ॥ ८९ ॥
कर्म श्रीकृष्ण मायोत्थं कल्मिन् हता शुभाशुभम् ।
निवारिय मम कर्मा बन्धन त्वां कथं भजे ॥९०॥
कारा पाश गर्भे यह कर्म-चक्रं सुदुर्धिम, ।
भव-सिन्धौ विमुग्धोऽहं कथं यामि त्वयि प्रभो ॥ ९१ ॥
पतन बन्धनं वह लंघकर दयया माम् ।
प्रसादं करुणा-धाम, न गति मम् तवां विना ॥९२॥ (
यामीश्वर त्वया दृष्टा ताराय प्राण दुर्लभम् ।
नाथ मां महाविष्णो त्व निरावरणो भव ॥ ९३ ॥
रजस्तमोमयो नित्यं त्वया मान-मदान्वितः ।
निर्मेय त्वां कथं जानेऽपाय-विद्धं त्वया विना ॥ ९४ ॥
विश्वे मोऽनेऽनि गर्भारे गहने च महार्णवे ।
नानु-नमस्यापि पारं त्वं गाजमे यो महोत्पलः ॥ ९५ ॥
सूक्ष्मात् सूक्ष्मं कथं तत् त्वां बुद्धि वेत्स्यति मे जडा ।
कर्मानुसारिणी स्थूला, त्वया विना, ऽऽविमाऽऽकुला ॥९६॥

त्वत्त स्त्वं परमः शम्भुः त्वे मत्तश्चित् विराजितः ।
त्वत्त वा त्वद्र शोभोऽहं मोह पङ्क-जलद्दिनः ॥ ९७ ॥
कथं त्वाञ्च गमिष्यामि निर्बल दयाम् त्वया विना ।
अहैतुक त्वया त्रिको पाहि मां पाहि मां प्रभो ॥ ९८ ॥
काल-पाशेन संबद्ध माद्दृशं मोह कर्षितम् ।
मातृवत जगन्नाथ त्वयाया पर्योडितम् ॥ ९९ ॥
त्वमिनाथा पिता माता गत्यागत्यं पतिः प्रभुः ।
त्वमेव दुःखि शम्भो गुरु सुख साख दायक ॥ १०० ॥
बालकस्य यथा निवा सर्वे कश्चित् परोऽपि ।
तथा मे भगमाभिना त्वदेवकश्चित् कृपार्णवे ॥ १०१ ॥
इन्द्रियाणि मनः प्राण जिव स्मृति बारह मे ।
आवर्ते मां जगन्नाथ त्वरित त्वीपदाब्जितः ॥ १०२ ॥
किञ्चनाति न म,नु व जिवा त्वया,विनाक्षना ।
यथाना दर्शि म भक्ति त्वरित निज पिरे प्रभो ॥ १०३ ॥
जिनात् [illegible] सदा [illegible] मा आगन्तो सर्व [illegible] ।
[illegible] ॥ १०४ ॥
[illegible] ।
[illegible] ॥ १०५ ॥
[illegible] ।
[illegible] ॥ १०६ ॥
[illegible] ।
[illegible] ॥ १०७ ॥

न वाञ्छामि सुखं भोगं कैवल्यमपि दुर्लभम्
प्रयच्छ मे दृढां भक्तिं तव श्रीचरणाम्बुजे ॥ १०८ ॥
देव देव महाराज दास तव च भावय ।
देहि मे निर्मलां भक्तिं त्वयि प्रेमास्पदे ध्रुवं ॥१०९॥
प्रसीद मे महाराजश्री प्रसीद शिव भावज ।
सर्वाभिलाषिता शून्यां भक्तिं देहि त्वयि प्रभो ॥ ११० ॥
कर्णाभ्यां श्रवो नित्यं तवैव नाम कीर्तनम् ।
करौताभ्यां करो नित्य तवैव पाद-सेवनम् ॥ १११ ॥
जिह्वाभ्यां वचो नित्यं तवैव कीर्तनामृतम् ।
घ्राणाभ्यां घ्राणो नित्य त्वामेव शान्ति दायकम् ॥ ११२ ॥
नयनाभ्यां हृदाकाशे विद्युत् कोटि सम-प्रभ ।
निरताभ्यां सदा मूर्त्तिं सच्चिदानन्द-विग्रह ॥ ११३ ॥
मानसं मे यदा ध्यानं त्वद्-विग्रहं भविष्यति ।
कृपया हे दया-सिन्धो सर्वेश्वर सदाशय ॥११४॥
ध्यायामि त्वामहं नित्यं पश्यामि सर्वदा प्रभो ।
नमामि त्वां सदा-कान्तम्—एवं कुरु महेश्वर ॥ ११५ ॥
नमामि त्वां जगद्-बन्धो नमस्ते परमात्मने ।
नमो विश्वरूपे तुभ्यं नम पार्षद-कर्मणे ॥ ११६ ॥
नमो देवादि-देवाय परिपूर्ण-स्वरूपिणे ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥" ११७ ॥
विततम्—विस्तृतम् ।

भव-पिष्टः—संसारेण दलितः, मर्दितः, चूर्णीकृतः।

गह्वनम्—दुर्गमम्। दुष्प्रवेशम्।

१०२म श्लोकः—"दुहन्त्योऽभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः। पयोऽधिश्रित्य संयाव मनुद्वास्या परा ययुः॥ परिवेशयन्त्य स्तद्धित्वा पाययन्त्यः शिशून् पयः। शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम्॥ लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने। व्यत्यस्त (विपर्यस्त) वस्त्राभरणाः काश्चित् कृष्णान्तिकं ययुः॥ ता वार्यमाणाः पतिभिः पितृभि र्भ्रातृबन्धुभिः। गोविन्दापहृतात्मानो न न्यवर्तन्त मोहिताः॥"

नित्य-प्रियः—"निरुपाधि-प्रेमास्पदत्वम्—वात्सल्यम्॥"

जनार्दनः—जनै रर्द्यते याच्यते पुरुषार्थ-लाभाय। अथवा जनन मर्दति हिनस्ति ताडयति वा।

ष्वङ्-ष्वे—[ष्वञ्ज्—आलिङ्गने, to embrace.]

रतिः—रागः। अनुरागः। प्रीतिः। क्रीडा।

कैवल्यमपि दुर्लभम्—"सालोक्य सार्ष्टि सामीप्य सारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत् सेवनं जनाः॥" इति भागवतम्॥

भावय—[भू (स्थितौ) + णिच्] keep

एवं स्तुत्वा ततो दत्वा पुष्पाञ्जलिं विधानतः।
पश्च भोजनं कुर्याद् भक्ति-भावेन मोदितः॥ ११८॥

नीराजनम्—दीपादिना प्रतिमादेः आरात्रिकम् । निर्मञ्छनम् ॥ "आदौ चतुष्पाद-तलैकदेशे, द्वौ नाभि-देशे, मुख-मण्डले त्रीन् । सर्वेषु गात्रेषु च सप्तवारानारात्रिकं तन्त्रविदो वदन्ति ॥" पञ्च-नीराजनम्—पञ्च-प्रकारारात्रिकम् ॥ "पञ्च-नीराजनं कुर्यात् प्रथमं दीप-मालया । द्वितीयं सोदकाब्जेन तृतीयं धौत-वाससा ॥ चूताश्वत्थादि-पत्रैश्च चतुर्थं परिकीर्तितम् । पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि ॥" इति कालोत्तर-तन्त्रम् ॥ "मन्त्र-हीनं क्रिया-हीनं यत् कृतं पूजनं हरेः । सर्वं सम्पूर्णतामेति कृते नीराजने शिवे ॥" इति स्कान्दे शिवोमा-संवादे ॥ "कृत्वा नीराजनं विष्णोः दीपावल्या सुदृश्यया । तमो-विकारं जयति जित्वा तद्विंश्च को भवः ॥" इति हरि-भक्ति-सुधोदये ॥ [कर्पूर-गन्धधूप-चामर-व्यजन-प्रभृतिभिरपि नीराजनं क्रियते ।] शङ्ख-घण्टादि वाद्यैः सह भक्ति-भावेन नीराजनं कुर्यात् ।

ततश्च प्रणतिं कुर्यात् पतित्वा दण्डवत् क्षितौ ।
नमुत्वेन समायुक्तः प्रेम-वाष्प-परिप्लुतः ॥ ११८ ॥

प्रणतिः—भक्ति-श्रद्धातिशययुक्त-नमस्कारः । स चतुर्विधः । (१) अभिवादनम् (नामोच्चारण-पूर्वक-नमस्कारः ; 'अभिवादये भो अमुक-शर्माहम्'—इत्येवं रूपः । तत्र पाद-स्पर्श-पूर्वक-नमस्कारः ; पाद-ग्रहणम् ।) । (२) अष्टाङ्गः (पद्भ्यां कराभ्यां जानुभ्याम् उरसा शिरसा दृशा । वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः ॥) । (३)

पञ्चाङ्ग' (बाह्याभ्यासेन आम्भसा [illegible]) । पञ्चा [illegible]
[illegible] ॥) । (४) [illegible]

[illegible] शीतेन [illegible] पूर्णं ।
[illegible] ॥ [illegible]

[illegible] गर्भो [illegible] ।
[illegible] ॥ [illegible]

[illegible] कृत्वा [illegible] ।
[illegible] ॥ [illegible]

[illegible] कृत्वा [illegible] ।
[illegible] ॥ [illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

पाद्मे क्रियायोगसारे ॥ "शङ्ख-हस्तेन सर्वत्र दक्षिणं परिकीर्तितम् ।" इति विष्णुमार्गे ॥

नैवेद्यं चरणोदकम्—(चरणोदकम् = पादोदकम् । चरण-धौत-जलम् । चरणामृतम् ।) "हृदि रूपं मुखे नाम नैवेद्यं मुदरे हरेः । पादोदकञ्च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥ नैवेद्यमन्नं तुलसी-विमिश्रं विशेषतः पाद-जलं पिबेच्च । योऽश्नाति नित्यं प्रयतो मुरारेः प्राप्नोति सुमेन युतां स भक्तिम् ॥ एष एव परो धर्म इदमेव परं तपः । इदमेव परं तीर्थं विष्णु-पादाम्बु यत् पिबेत् ॥" "पादोदकञ्च निर्माल्यं नैवेद्यञ्च विशेषतः । महाप्रसाद इत्युक्त्वा ग्राह्यं विष्णोः प्रयत्नतः ॥" इत्येकादशीतत्त्व-धृतं मत्स्य-सूक्त-वचनम् ॥

अर्चनाच्च जपाद् ध्यानात् कीर्तनात् स्मरणाद्धरेः ।
तत्-कथा-श्रवणात् पुण्याद् वन्दनाच्चित्र-सेवनात् ॥१२५॥
तत्-पादोदक-पानाच्च तन्निवेदित-भोजनात् ।
सर्व-कर्मार्पणात् तस्मै शिरसाक-निवेदनात् ॥१२६॥
भक्तानां पुण्य-संसर्गात् पुण्य-तीर्थ-निषेवणात् ।
भक्तिः सञ्जायते नृणां सारात्सारा परात्परा ॥१२७॥

कीर्तनात्—"ॐ स कीर्त्यमानः शीघ्रमेवाविर्भवति अनुभावयति भक्तान् ।" ना. उ. ॥

तन्निवेदित-भोजनात्—"ये विप्रा हरये दत्वा नित्य मन्नञ्च भुञ्जते । उच्छिष्ट भोजनात् तेषां हरिं दास्यं प्रभेवरः ॥"

वैराग्येण हरि-ध्यानं श्रद्धा-भक्ति-समन्वितम् ।
विधुनोति मलान् सर्वान् दुःख-ताप-प्रदायकान् ॥१३६॥

स्वरूपावरको यस्तु सोऽविवेक स्तमोमलः ।
या जडेषु ममाहन्ता भ्रान्तो मोह-मयो-मलः ॥१३७॥
नाना-विषय-भोगेच्छा महामोह-मयो-मलः ।
यस्मात् क्रोधश्च मृत्युश्च कर्म-पाशो भयावहः ॥१३८॥

विषयेषु सदा पश्येद् दोषं पापं भयानकम् ।
जगन्नाथे सदा पश्येत् सुखं शान्तिं शिवं शुभम् ॥१३९॥

सर्वं विश्वं महाविष्णोः मायया कल्पितं मृषा ।
त्यक्त्वा विश्वं भजेन्नित्यं सत्यमेकं निरञ्जनम् ॥१४०॥

विहाय नाम-रूपाणि रतिं कुर्यान्महेश्वरे ।
असारे खलु संसारे सार माराधनं हरेः ॥१४१॥

स्वप्नेऽपि जागरे चैव स्मृतिः शम्भो रघौघनुत् ।
शम्भु-स्मृति-प्रभावेण तरेन्मायां सुदुस्तराम् ॥१४२॥
अघौघनुत्—पाप-समूह विनाशिका ।

जल्पना यज्ञ-सूत्रेण विद्यया दीक्षया च किम् ।
यदि नो भजते विष्णुम् आद्यम्पुरुष मव्ययम् ॥१४३॥

अतएव जगद्बीजं स्वेष्ट-देवं प्रपूजयेत् ।
प्रतिमासु शिलाबुद्धिं परित्यज्य विचारतः ॥१४६॥

प्रतिमासु शिलाबुद्धिः—वैष्णव-शास्त्रोक्त ६४ प्रकारापराधान्तर्गतापराध विशेषः । [(१) इष्टदेवे देव-विशेष-बुद्धिः । (२) शास्त्रे पौरुषेय-बुद्धिः, साधारण-ग्रन्थ-बुद्धिर्वा । (३) वैष्णवे जाति-बुद्धिः । (४) श्रीगुरौ साधारण-मानुष-बुद्धिः । (५) प्रतिमायां दारु शिलाद्यादि-बुद्धिः । (६) प्रसादे खाद्य-बुद्धिः । (७) चरणोदके जल-बुद्धिः । (८) तुलस्यां साधारण-वृक्ष-बुद्धिः । (९) गवि साधारण-पशु-बुद्धिः । (१०) भगवल्लीलासु मानव-कृत-बुद्धिः । (११) नामलीलायां काम-चेष्टा-बुद्धिः । (१२) सखीभावे स्वर्गाप्सरो-बुद्धिः । (१३) नास्तिकत्वम् । (१४) भय-पूर्वकं धर्माचरणम् । (१५) अश्रद्धा-पूर्वकं धर्माचरणम् । (१६) आलस्य-पूर्वकं धर्माचरणम् । (१७) महापुरुषाणां बाह्य-चरित्र-दर्शन-पूर्वकः गुण-दोष-विचारः । (१८) अभिमानः । (१९) शास्त्र-देवतादि-निन्दनम् । (२०) मान्य-दण्ड-पादुकाभ्यां भगवद्-गृहे गमनम् । (२१) देवं पृष्ठीकृत्योपवेशनम् । (२२) अशुचिर्भूत्वा मन्दिर-प्रवेशः । (२३) ताम्बूल-भक्षणम् । (२४) काम-क्रोधादि-चेष्टा । (२५) उच्च-हास्यम् । (२६) कुचेष्टा । (२७) उच्चवाक्यम् । (२८) अश्लीलवाक्यम् । (२९) मिथ्या वाक्यम् । (३०) मादकसेवनम् । (३१) परहिंसा । (३२) कुसङ्गः । (३३) आत्म-स्तुतिः । (३४) इष्टदेवतातिरिक्तेषु निर्भरता । (३५) पोष्यभरणे त्रुटिः । (३६) पापाचरणम् । (३७) अनिवेदित-द्रव्य-

पञ्चमोल्लासः।

पूजां परिसमाप्याथ नित्य-श्राद्धं समाचरेत्।
भोजयेदतिथीन् भिक्षून् अभ्यागतान् समादरात्॥ १॥

श्राद्धम्—शास्त्रोक्त-विधानेन-पितृ-कर्म। "संस्कृत व्यञ्जनाद्यञ्च पयोदधिघृतान्वितम्। श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते।" इति पुलस्त्य-वचनात् श्रद्धया पित्रादेः दानं श्राद्धम्। अपि च। सम्बोधन पदोपनीतान् पित्रादीन् चतुर्थ्यन्त पदेनोद्दिश्य हविस्त्यागः श्राद्धम्।

नित्य श्राद्धम्—"अहन्यहनि यच्छ्राद्धं तन्नित्य मभिधीयते॥" "नित्यश्राद्धन्तु कुर्वीत प्रयत्नात् प्रतिदिनं सुतम्। दद्यादहरहः श्राद्ध मन्नाद्येनोदकेन च। पयो मूल फलैर्वापि पितृभ्यः प्रीतिमावहन्॥" इति बृहद्धर्म पुराणे॥

श्रद्धया यो ददात्यन्नं सव्यञ्जनं बुभुक्षवे।
तेन तत् कर्मणा मर्त्यम् भागनीयः सदाऽर्च्यते॥ २॥

अन्नम्—[अद् भोजने+क्त] भोज्य-द्रव्यम्॥ व्यञ्जनम्—अन्नोपकरणम्। तत् शाक-सूपादि।

भूमिभ्यो दीयतामन्नं सह घोषेन सादरम्।
सर्वेषामप्यलाभे तु खाद्यं गोभ्यो निवेदयेत्॥ ३॥

जाठराग्नि-विचारतः—"मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् । स्वभावतश्च गुरु यत् तथा संस्कारतो गुरु ॥ मात्रा गुरुस्तु मुद्गादि मांसादिः प्रकृते गुरुः ॥ संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम् ॥" इति भाव-प्रकाशे ॥

उपतापः—रोगः । उत्तापः । सम्भ्रमम् ।

भक्षयेद् देह-रक्षार्थं विष्णु-प्रीति-निमित्तकम् ।
लोभाभो भोजनं कुर्यात् लोभः परम-हानिदः ॥ १४ ॥

लोभो यत्र सदा तत्र रिपवः षट् सुनिश्चितम् ।
लोभेन च प्रमादेन साधको नश्यति ध्रुवम् ॥ १५ ॥

लोभः पापस्य बीजञ्च नरक द्वार मुच्यते ।
तस्माल्लोभं दपा-बीजं समूलं परिवर्जयेत् ॥ १६ ॥

अन्न-पानादिभिः कुक्षे भागत्रयं प्रपूरयेत् ।
वायु-सञ्चारणार्थाय चतुर्थं मवशेषयेत् ॥ १७ ॥

कुक्षिः—उदरम् ।

भुञ्जीतानति-दग्धं हि युक्ति-युक्तञ्च सात्त्विकम् ।
सुसंस्कृतं हितं स्निग्धं भुञ्जीतान्नं यथोचितम् ॥ १८ ॥

संस्कृतम्—पक्वम् । शोधितम् । विशुद्धम् । मन्त्र-पूतम् । ा-पूतम् ।

स्वप्नादिपर्यन्तं भुक्तं न स्यात् भोक्तुः पुनः स्वरका ॥" उद्यायद्वि-
स्मृत्वाहो ईर्ष्यामर्गौ यथोचितः । मधुना सह दिवा च यथा-
काल-उपभोजनं ॥

राजसं तामसं सर्वम् अन्नं पानं सदा त्यजेत् ।
अति द्रुतं न भुञ्जीत नैव चाति विलम्बितम् ॥ २० ॥
ईर्ष्यादिकं समस्रोत्या खादी इन्द्रिय सुप्रीणितम् ।
माना-पापो भवेद् येन परिपाक-सहायकः ॥ २१ ॥

आहारं षड् विधं चूष्यं पेयं लेह्यं तथैव च । भोज्यं
भक्ष्यं तथा चर्व्यं गुरु विद्याद् यथोत्तरम् ॥ (१) चूष्यम्—इक्षु-
दाडिमादि । (२) पेयं—पानक शर्करोदकादि । (३) लेह्यं—
रसाला-क्वथितादि । (४) भोज्यं—भक्त-सूपादि । (५) भक्ष्यं
लड्डुक-मोदकादि । (६) चर्व्यं—चिपिट-चणकादि ।

मात्सा—[मस् (ईर्ष्यायाम्) + णि + घञ्] सुखभङ्ग-जनम् ।

परिपाक—अत्यम्बु-पानात्, विषम-भोजनात्, मल-मूत्रादीनां
...-धारणात्, दिवा-स्वप्नात्—लघु भोजनमपि पाकं न भजते ॥
...र्ष्या-भय-क्रोधादि-समन्वितस्य, लुब्धस्य, व्याधि-दैन्य-पीडितस्य,
...द्वेष-युक्तस्य भुक्तान्नं सम्यक् न परिपाक मेति ॥" "मानसाग्नि
...र्षि तु सामभावेन दुष्यति ॥"

पक्वा पाके प्रशस्ते च माथीयात् गृह-भाजने ।
मौनी भूत्वा प्रसन्नेन मनसाऽन्नं शिव-प्रदम् ॥ २२ ॥

उपविश्यासने शुद्धे स्वेष्ट-देवं विचिन्तयेत् ।
माधुर्यं तं मनसा भक्त्या तस्मै चान्नं निवेदयेत् ॥ २३ ॥

तस्योच्छिष्टं सदा-पूतं सर्व-पावन-पावनम् ।
प्राश्नीयात् संयतः शुद्धः परम-प्रेम-कारणम् ॥ २४ ॥

उच्छिष्टम्—भुक्तावशिष्टम् । "नारायणोच्छिष्ट मिष्ट मनि-वेद्यमभक्ष्यकम् ।" इति ब्रह्मवैवर्ते ॥

अथवा जुहुयादन्नं हृदि-स्थितेऽन्तरात्मनि ।
पश्येद् वा परमं ब्रह्म भोक्तर्यन्ने च भोजने ॥ २५ ॥

भोजने—भोजन-क्रियायाम् ।

भोजनान्ते जलेनैव समाचामेद् यथोचितम् ।
निर्हृत्य दन्त-लग्नानि तृण-ग्रहण-पूर्वकम् ॥ २६ ॥

तृणः—दन्त-मल-निष्काश-शलाका । Tooth-pick.

ततः पाद-शतं गच्छेत् स्मरन् विष्णु सनातनम् ।
शयीत वाम-पार्श्वेन किञ्चित् काल मतःपरम् ॥ २७ ॥

"भुक्त्वा शतपदं गच्छेत् शनैः स्तैन तु जायते । अन्न-संघात-शैथिल्यं ग्रीवा जानु-कटी-सुखम् (श्रमम्) ॥" भोजनान्ते (१) उपविशतः—तुन्दं वर्धते, (२) शयानस्य—पुष्टि वर्धते, (३) पद-शतं शनैः गच्छतः—परमायु र्वर्धते, (४) धावतः—पश्चात् मृत्यु र्धावति ॥

जीवनम्। पञ्चतापि गोविन्द-चरणस्य कथं भवेत्॥"]

पुण्य-शास्त्रादि—Cf. "यस्मिन् शास्त्रे पुराणे वा हरिभक्ति र्न दृश्यते। न श्रोतव्यं न मन्तव्यं यदि ब्रह्मा स्वयं वदेत्॥"
स्नानाद्यम्—उभयत्र काशीखण्डम्। भागवतम्।

स्नानगन्धादि सर्वाणि तीर्थानि पावनानि च।
यत्र विष्णु-कथाऽऽलापः सहसा तैर्मिलेः सह ॥१०॥

संसार-दुर्गमारण्ये हिंस्र-जन्तु-समाकुले।
सत्सङ्गं हि हरेर्नाम-सद्धर्मं विघ्न-खण्डनम् ॥११॥

तव कथा-सुधा-पाने यो मत्तः प्रेम-विह्वलः।
विस्मरत्येव सर्वाणि—देहं गेहं प्रियाप्रियम् ॥१२॥
चिदानन्द-रसे मग्न अस्त्येव मनुजामयम्।
विश्वं सुधामयं तस्य सुधा जगन्मयी ध्रुवम् ॥१३॥

* 'तव-कथामृतं तप्त-जीवनं, कविभिरीडितं कल्मषापहम्। श्रवण मङ्गलं श्रीमदाततं, भुवि गृणन्ति ये भूरिदा जनाः॥" इति भागवतम्॥

अनित्यं जीवनं ज्ञात्वा वासनां परित्यजेत्।
श्रोतव्यः कीर्तितव्यश्च सर्वदा दीन-बान्धवः ॥१४॥

किं कुर्वन्ति पिता माता किं कुर्वन्ति च बान्धवाः।
सर्वं करोति विश्वात्मा पृथ्वी यस्य [illegible] सः ॥१५॥

पुण्य करोति ।

सत् कृता मत गत गड्ढो स्नोत गड्ढ ।
निरागीव भाग मा गत निवेन विधीयते ॥३६॥

सा गद गन्म शिव मङ्गलायेति निश्चयन् ।
शिवं निभयसा ज्ञात्वा निश्चिन्त स्मरण् पुमान् ॥३७॥

विना नारायण स्मृत्या चित्त शुद्धि न जायते ।
भक्त्या सङ्कीर्तिते कृष्णे सर्व पाप प्रणश्यति ॥३८॥

ज्ञात्वा श्रुत्वा सदा तस्य नामैक मङ्गल शुभम् ।
रूप लीलां स्वरूपञ्च ध्यात्वा तस्य प्रतिक्षणम् ॥३९॥
दृष्ट्वा चात्म-प्रदीपं तं सर्वत्र सर्व कर्मसु ।
याति ब्रह्मपदं सत्यं यस्मान्नो विनिवर्तनम् ॥४०॥

कर्मणि स्वे रतो नित्यं स्मरेद् विष्णु मधोक्षजम् ।
तत्-कृपा निश्चितं पुंसां कर्म-निर्मूल-कारिका ॥४१॥

षष्ठोल्लासः ।

अपराह्णे च कार्याणि यानि कर्माणि तानि च ।
कुर्यात् सर्वाणि सोत्साहं स्मरन् सत्यं जनार्दनम् ॥१॥

अपराह्णः—दिन-शेष-भाग । विश्राम इति ख्यात । इत्यमर ॥ त्रिधा-विभक्त-दिनस्य तृतीय-भाग ।

सायं-काले ततः प्राज्ञः सायं-सन्ध्यां समाचरेत् ।
होमं कुर्याद् यथा शास्त्रं ज्वलिते हव्य-वाहने ॥२॥

असम्पन्नं दिवा-कृत्यम् यत्-परं समापयेत् ।
कु-कृतं यद् दिवा-भागे तत् कार्यमपि शोधयेत् ॥३॥

भुञ्जीताथ यथा-कालम् अन्नं पोष्य-गणैः सह ।
लघ्वाहार स्तमस्विन्यां सर्वत्रैव प्रशस्यते ॥४॥

तमस्विनी—रात्रिः ।

भोजनान्ते सुखासीनो विश्राम्यैव मुहूर्तकम् ।
तदन्ते पूजयेद् भक्त्या मनसा शिव मव्ययम् ॥५॥

प्रसन्न मानसो भूत्वा शुद्ध सत्त्वे व्यवस्थित ।
निष्प्रपञ्चं निरालम्बं शिवं शान्तं विभावयेत् ॥६॥

तं देवं परमात्मानं शुद्ध-भाव समन्वितः ।
शुद्धं बुद्धं निराकारं स्तुयादेवं परात्परम् ॥७॥—

नमस्ते परमात्मन् नमस्ते परमामृत ।
[illegible] निर्गुणाय नमो नमः ॥७॥
नमस्ते [illegible] मनो,वाक् संज्ञा नाम विवर्जित ।
[illegible] मध्यान्त [illegible]नाय शाश्वताय नमो नमः ॥८॥
नमस्तुभ्यं निराभास निर्विशेष निरञ्जन ।
परिच्छेद विहीनाय निष्कलाय नमो नमः ॥१०॥
नमस्तुभ्यं सविशेष निर्विकल्प निरामय ।
द्वैताद्वैत विहीनाय नित्याय नमो नमः ॥११॥
नमः सत्याय पूर्णाय शङ्कराय नमो नमः ।
अव्ययाय विशुद्धाय विशोकाय नमो नमः ॥१२॥
नमस्ते परमानन्द नमस्ते परमाक्षर ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥१३॥
किञ्चनापि यदा नाभूत् खं नापि दिनादिकम् ।
मरणामरणे नास्तां सत्वासत्व न किञ्चन ॥१४॥
बभाय त्वं तदाद्वैतः स्वे पूर्णत्वे विराजित ।
आत्मारामः स्वयञ्ज्योतिः समाधिस्थ इवाचलः ॥१५॥
दृष्टृ-दृश्ये यदा नास्तां रेजिथ त्वं चिदि स्थितः ।
गम्भीरादति-गम्भीरो दुष्प्रवेशः सुगूढकः ॥१६॥
तत्-त्वय्येव सदा-शान्ते परमाश्चर्य-कर्मणि ।
ब्रह्माण्डानि स्फुरन्त्येव तरङ्गा इव सागरे ॥१७॥
माहात्म्य-मण्डिते नित्ये त्वयि चैतन्य-वारिधौ ।
आविर्भूता स्तिरोभूता अगण्या विश्व-बुद्बुदाः ॥१८॥

असंख्येयानि विश्वानि नानारूपाणि सर्वदा ।
बुद्बुदा त्वयि पूर्णेऽस्मिन् निर्लिप्ते निर्विकारके ॥१९॥
अत्रैवेह विश्वानां भवनाशौ सनातनम् ।
राजसे त्वं महानात्मा समः शान्तो निरञ्जनः ॥२०॥
कथमिदं—न जानन्ति शास्त्राण्यपि कदाचन ।
महामायाविनं देवं त्वामेव प्रणमाम्यहम् ॥२१॥
मणि-विश्वं सुविस्तीर्णं शैल-कानन-संयुतम् ।
नक्षत्रादिभिः समायुक्तं चन्द्रार्कादि-विमण्डितम् ॥२२॥
मणि-विश्वं परायत्तं स्वप्रकाश-प्रकाशकम् ।
अर्पितं त्वयि तद् येन तस्मै तुभ्यं नमो नमः ॥२३॥
यतः पूर्णमिदं पूर्णं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥२४॥
पूर्णाय पूर्ण-रूपाय शिवशक्तियुत-रूपिणे ।
सामरस्याय नित्याय तुभ्यं नित्यं नमो नमः ॥२५॥
यस्मिन् निष्कारणे विश्वं साक्षिण्येव चिरन्तने ।
ओतप्रोतमिदं सर्वं तस्मै तुभ्यं नमो नमः ॥२६॥
सर्वेदञ्च त्वयीदञ्च त्वमेवेदं सुनिश्चितम् ।
त्वमेवास्मिन् महादेव तथा शिवं प्रणमाम्यहम् ॥२७॥
त्वमेव कारणं कार्यं क्रिया त्वं करणं तथा ।
अव्यक्तश्च तथा व्यक्तं त्वमेकः सर्व-रूपभाक् ॥२८॥
उत्पद्यन्ते सर्व-विश्वानि लीलाधरे त्वयि स्थिरे ।
भूत्वा भूत्वा विलीयन्ते नश्वराणि सनातने ॥२९॥

त्वं हि नाथो गतो नित्यं मोमा होन विदर्णयः ।
विश्वानां स्थिति-कान्तौ;पि प्रलये च सदा मम: ॥३०॥
यावत् प्राप्यसे त्वत्र तावज्जीवस्य बन्धनम् ।
तावत् तस्यास्ति संसार स्ततात् नात्र वयं ध्रुवम् ॥३१॥
यदा त्वं लभ्यसे पुंसा तदा तस्य विमोचनम् ।
तदा वै परमानन्दो निर्वाणश्च निरामयम् ॥३२॥
प्राप्स्यामि त्वां मनिर्दिश्यं कथं नाथ परात्परम् ।
सङ्गहीनं निरालम्बं निर्गुणं निरुपाधिकम् ॥३३॥
प्रकाश्य स्वं न नेत्रेण त्वया नेत्रं प्रकाशितम् ।
पश्यामि त्वां कथं शम्भो निराकार मतीन्द्रियम् ॥३४॥
प्रकाश्य स्वं न चित्तेन त्वया चित्तं प्रकाशितम् ।
जानामि त्वां कथं देवम् मप्रतर्क्यं मलक्षणम् ॥३५॥
भाव-गम्यः सदा त्वं हि भक्त्या लभ्य स्त्वनन्यया ।
निर्वेदेण मनुष्येण श्रद्धान्वितेन धीमता ॥३६॥
भक्त्या विज्ञायते तत्त्वं सत्यं साक्षात्-कृतं भवेत् ।
भवेच्च शाश्वती मुक्तिः स्वरूपावस्थितिः परा ॥३७॥
नैव भक्त्यातिरिक्तञ्च क्वचिद् वाञ्छामि किञ्चन ।
भक्तिरेकं बलं नृणां, सम्पदः पद मापदाम् ॥३८॥
त्वमेको हि मया सेव्यः शुद्धो बुद्ध चिदात्मकः ।
शुद्धां भक्ति महं याचे दयस्व मे दयानिधे ॥३९॥
दृश्य-मोह-मयं जीवं ज्ञात्वा मां मुक्त-बन्धनम् ।
एकीकुरु जगन्नाथ त्वयि ब्रह्म-महार्णवे ॥४०॥

त्वमेवैको विराजस्व विजयस्व जगत् पते ।
त्वमेवैकः मनोहरश्च सर्वं माहात्म्य नित्य च ॥४१॥
विस्मयं भवनात् सर्वं, जडत्वं मायया पूर्णचित् ।
मधु वातु सर्वाणि पञ्चानि त्वां निरन्तरम् ॥४२॥
परमाणौ सदा शैले पावन त्वं मनोहर ।
प्रेम ज्ञानं शिवं पुण्यं त्वयानन्तो सर्वत्र सदा ॥४३॥
गायन्ती यमुना गङ्गा महिमानं तव प्रभो ।
वदन्तु ते तु मन्दिरं जगत् तृषा: मनोरमा ॥४४॥
ज्योतिष्मतां प्रकाशे च सर्वत्रन्यस्य शङ्कर ।
चिदाकाशं महाकाशं पूजया व्याप्य प्रभो ॥४५॥
पश्यता व्यजनं त्वां हि नाश्यत् किञ्चित् कदाचन ।
शृण्वतात् श्रवणं त्वां हि नाश्यत् किञ्चित् कदाचन ॥४६॥
एको देव सदा नित्य स्थित: शान्तो निरञ्जन: ।
एको देव: सदा नित्य संसार-ध्वान्त-नाशन ॥४७॥
निर्मलाय प्रकाशाय केवलाय शिवाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नम: ॥" ४८॥

निर्विकल्प—विकल्प रहित: । विशेष्य-विशेषणता-सम्बन्ध-शून्य: । ज्ञातृ-ज्ञेयता-भेद-शून्य: । अखण्ड-ज्ञान-रूप: ।

खम्—आकाशम् ॥

बभाय—[भा (दीप्ति to shine, to appear) + लिट्]

आत्मारामः—आत्मा आराममिव रतिस्थानं रतिसाधनं वा यस्य ॥

... -यानि ।

गजिय ... गज ... [illegible] ...]

महिमा—... महिमा ... महत्त्वम् । प्रसिद्धि । महीयसी कीर्ति ॥

गोचरातीतम्—अगोचरम् ॥ अतीन्द्रियम्—अतिक्रान्तमिन्द्रियं तद्विषयतां याम् । इन्द्रियागोचरम्, इन्द्रियाग्राह्यम् ॥

अनन्या—अन्यैः सह सम्पर्क-रहिता । अभिन्ना । भेद-विरहिता ॥ आपत्—विपत् । विपत्ति ।

निरन्तरम्—निर्गतमन्तरं यस्मात् । अविच्छेदम् । अनव-काशम् । सततम् ॥ स्मयस्व—[स्मि ... स्मितं कुरु ।

स्यन्दलाम्—[स्यन्द् (स्रुतौ, चरणे—...)]

एवं स्तुतिं समाप्याथ ब्रह्म-भावं विचिन्तयन् ।
पवित्रां सुत्तमां शय्यां गच्छेत्तरः समाहितः ॥४८॥

शय्या—"त्रि-दोष-शमनी खट्वा तूली वात-कफापहा। भूशय्या बृंहणी (उपचयकारिका) वृष्या (शुक्रकारिका) काष्ठ-पट्टी तु वातला ॥" "भूशय्या वातलातीव।" "सुशय्या-शयनं हृद्यं पुष्टि निद्रा-धृति-प्रदम् । श्रमानिल-हरं वृष्यं विपरीत-मतोऽन्यथा ॥"

शान्तः प्राची-शिराः स्वप्यात् अथवा दक्षिणा-शिराः ।
वामे वा दक्षिणे पार्श्वे स्वप्यान्नरो जितेन्द्रियः ॥५०॥

स्खलनं ब्रह्म-चर्यस्य निषिद्धं मरणोपमम् ।
कामान्न स्कन्दयेत् शुक्रं, शुक्रं हि जीवनं ध्रुवम् ॥५१॥

शुक्रम्—[शुच् (शुचौ)+रक्] मज्ज-जात-धातुः। [तत्-पर्यायः—पुंस्त्वम्। वीर्यम्। पौरुषम्। तेजः। इन्द्रियम्। बलम्। मज्जारसः।…॥ इति राज-निर्घण्टः॥] "रसाद् रक्तं ततो मांसो मांसान्मेदः प्रजायते। मेदसोऽस्थि ततो मज्जा मज्जात् शुक्रस्य सम्भवः॥ शुक्रं सौम्यं सितं स्निग्धं बल-पुष्टि-करं स्मृतम्। गर्भवीजं वपुःसारो जीवस्याश्रय उत्तमः॥ जीवो वसति सर्वस्मिन् देहे तत्र विशेषतः। वीर्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात्॥ यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा। एवं हि सकले काये शुक्रं तिष्ठति देहिनाम्॥" [शुक्रं कामेन प्रवर्तते।]

धृते शुक्रे धृताः प्राणा धृत मायुर्धृतं मनः।
धृता शक्तिर्धृतो योगी जीवनं सफलं भवेत्॥ ५२॥

आयुः—जीवित-कालः। परमायुः।

संनियम्येन्द्रियग्रामं श्रद्धा-स्थापित-मानसः।
स्वप्यात् स्थिरं यथा-कालं, यथा-कालञ्च जाग्रयात्॥५३॥

रात्रि-जागरणं रूक्षं कफदोषविघातिं जिह्व। यथाकाल-सेविता निद्रा—धातु-साम्यम्, अतन्द्रितं, पुष्टि-वर्ण-बलोत्साहं, अग्नि-दीप्तिञ्च करोति॥

एवं कर्माणि सर्वाणि दैनिकानि समाचरेत्।
गत्वान्यत्र यदा दृष्टं प्रार्थयेत जगत्-पतिम्॥ ५४॥

जातानां जात-कर्मादि-संस्कारांश्च समाचरेत् ।
संस्कारेण विना नृणां शुद्धता न प्रजायते ॥ २ ॥

संस्कार—[सं+कृ+घञ्] शुद्धिः । दशविध-संस्काराः यथा । (१) विवाहः । (२) गर्भाधानम् । (३) पुंसवनम् । (४) सीमन्तोन्नयनम् । (५) जातकर्म । (६) नाम-करणम् । (७) अन्न-प्राशनम् । (८) चूडा-करणम् । (९) उपनयनम् । (१०) समावर्तनम् ॥

पितृ-श्राद्धादिकं कुर्याद् दद्यात् पिण्डान् यथोचितम् ।
अश्रद्धया कृतं श्राद्धं भवेद् दुष्टं सुनिश्चितम् ॥ ३ ॥

श्राद्धं कृत्वा द्यूतं, कलहं, दिवानिद्रां, पुनर्भोजनम्, अध्व-गमनं, मैथुनं प्रतिग्रहञ्च वर्जयेत् ॥

पिण्डः—श्राद्धीयद्रव्य-निर्मित-बिल्वफलाकारं पितृदेयमन्नम् ॥

"देवो यदि पिता जातः शुभकर्मानुयोगतः । तदन्न ममृतं भूत्वा देवत्वेऽप्यनुगच्छति । दैत्यत्वे मद्य-मांसादि पशुत्वे च तृणं भवेत् । मनुष्यत्वेऽन्न पानादि-नानाभोग-रसं भवेत् ॥" इति मत्स्य-पुराणम् ॥

विद्याऽनभ्यासतो नष्टा नष्टो धर्मश्च दम्भतः ।
ज्ञानं हि तृष्णया नष्टं नष्टं तपश्च कोपतः ॥ ४ ॥
योगश्च व्यस्त चित्तानां नष्टो यथा तथैव हि ।
नष्टं सर्वं शुभं कर्म यद्देवाश्रद्धया कृतम् ॥ ५ ॥

पूर्ण ज्योति ।

श्रद्धैव हि इह स्नानं ध्यानं दानं तपो जपः ।
श्रद्धया लभ्यते सर्वं यो यच्छ्रद्धः स एव सः ॥ ६ ॥

श्रद्धा — श्रत् + धा + अ, भावे, [चित्त-प्रसन्नता]। श्रद्धाया (१) बाल्ये विश्वासः। (२) यौवने—प्रीतिः, अनुरागः। (३) प्रौढत्वे —निर्भरता। (४) वृद्धत्वे—ज्ञानम्॥ [Comp (१) गुरु-वेदान्त वाक्यादिषु विश्वासः। इति वेदान्त सारः॥ (२) प्रत्यये धर्मकार्येषु सा श्रद्धेत्यभिधीयते। इति स्मृतिः॥ (३) सत्स्तुति ध्यानसूया च सदा श्रद्धेति कीर्तिता। इति देवल संहिता॥ (४) यत्पूर्वक सर्व-पुरुषार्थ-साधन-प्रयोगः, चित्त-प्रसादः, आस्तिक्य-बुद्धिः। इति मुण्डके शाङ्कर-भाष्यम्॥] "श्रद्धावान् लभते ज्ञानम्।" इति गीतायाम्॥

श्रद्धान्वितो यथा-शक्ति यथा-न्यायं यथाऽर्हणम्।
दरिद्रान् सज्जनान् भक्तान् मासान्ते भोजयेन्नरः ॥ ७ ॥

यथाऽर्हणम्—According to propriety. "भोजयेद् दक्षिणां दत्त्वा प्रणामं कारयेत् ततः ॥"

धर्मोत्सवान् महापुण्यान् कुर्यादाह्लाद-पूर्वकम्।
यथा-कालं यथा-योगं शास्त्र-निर्दिष्ट-वर्त्मना ॥ ८ ॥

उत्सवः—नियताह्लाद-जनक-व्यापारः।

यथा-योगम्—यथा-युक्तम्। Fitly, suitably, according to circumstances.

कृष्ण-जन्माष्टमीं पुण्यां श्रीराम-नवमीं तथा ।
कुर्यादेकादशीं भक्त्या शिव-रात्रिं सुपावनीम् ॥८॥

कृष्ण-जन्माष्टमी—भाद्र-कृष्णाष्टमी। सा च श्रीकृष्णस्य जन्मतिथिः ॥ "सव कृष्णाष्टमी पुण्या सर्वपाप-प्रणाशिनी।" कृष्णाष्टमी-व्रतं श्रेष्ठं सर्वकाम-फलप्रदम्।" इति सौर-पुराणम् ॥

श्रीराम-नवमी—चैत्र-शुक्ल-नवमी। सा च श्रीरामस्य जन्मतिथिः ॥ "चैत्रे मासि सिते पक्षे नवम्यां शोभने दिने। अतिपुण्ये सुधंलग्ने जातो रामः स्वयं हरिः ॥ पुनर्वस्वृक्ष-संयुक्ता सा तिथिः सर्वकामदा। श्रीराम-नवमी प्रोक्ता कोटिसूर्य-ग्रहाधिका ॥ यस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः। यत्किञ्चित् क्रियते कर्म तदक्षयकरं स्मृतम् ॥ उपोषणं जागरणं पितृनुद्दिश्य तर्पणम्। तस्मिन् दिने तु कर्तव्यं ब्रह्मप्राप्ति मभीप्सुभिः ॥ तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः। जपेदेकाग्र आसीनो यावत् स्याद्दशमी-दिनम्। तेनैव स्यात् पुरश्चर्या दशम्यां भोजयेद् द्विजान्। भक्ष्यभोज्यैर्बहुविधैर्भक्त्या दद्याच्च दक्षिणाम् ॥ कृतकृत्यो भवेत् तेन सद्यो रामः प्रसीदति ॥" इति श्रीराम-भक्तितरङ्गिणी।

एकादशी—[एकादशन्+डट्, ईप्] तिथि-विशेषः ॥ सा तु शुक्ल-पक्षे सूर्यमण्डलात् चन्द्र-मण्डलस्य निर्गमस्यैकादश-कला-क्रिया-रूपा। कृष्ण-पक्षे सूर्य-मण्डले चन्द्र-मण्डलस्य प्रवेशस्यै-

कादशकला क्रिया-रूपा ॥ हरि वासरम् । हरि-दिनम् ॥ कांस्यं माम ममुरञ्च चौद्रं चान्दत-भाषणम् । पुन र्भोजन मायामं दशम्यां परिवर्जयेत् ॥ पारण-दिनोक्त-निषिद्ध-द्रव्याणि च तदपि निषिद्धानि ॥ एकादश्यां मुभो पत्तो निराहारः ममाहितः । स्नात्वा सम्यग् विधानेन धौतवासा जितेन्द्रियः । संपूज्य विधिवद् विष्णुं श्रद्धया सुसमाहितः । पुष्पै र्गन्धै स्तथा धूपै र्दीपै र्नैवेद्यकैः परैः ॥ उपचारै र्बहुविधै र्जप-होम-प्रदक्षिणैः । स्तोत्रै र्नानाविधै र्नृत्य-गीत वाद्यै र्मनोरमैः ॥ एवं सम्पूज्य विधिवद् रात्रौ कुर्यात् प्रजागरम् ॥ चौद्रं मांसं सुरां तैलं व्यायामं क्रोध मैथुने। परान्न काम्यताम्बूले लोभं निर्माल्य-लङ्घनम् ॥ द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत् ॥ अपि च । वितथ-भाषणं, प्रवासः, दिवा स्वप्नं, अञ्जनं, मसूरं, द्यूतं, हिंसा, चणकम्— इत्यादीन्यपि वर्जनीयानि ॥

शिवरात्रि —शिवचतुर्दशी । "माघ-मासस्य शेषे या प्रथमे फाल्गुनस्य च । कृष्णा चतुर्दशी सा तु शिव-रात्रिः प्रकीर्तिता ॥" तस्यामुपवास प्रधानम् । "न स्नानेन न वस्त्रेण न धूपेन न चार्चया । तुष्यामि न तथा पुष्पै र्यथा तत्रोपवासतः ॥" इति शङ्करोक्तेः ॥ "ततो रात्रौ प्रकर्तव्यं शिव-प्रीणन-तत्परैः । प्रहरे प्रहरे स्नानं पूजाश्चैव विशेषतः ॥" "दुग्धेन प्रथमे स्नानं दध्ना चैव द्वितीयके । तृतीये च तथाऽऽज्येन चतुर्थे मधुना तथा ॥" "उपवास-प्रभावेण बलादपि च जागरात् । शिव-रात्रे

एकादशकला क्रिया कृता ॥ इति शयनम् । हरि-दिनम् ॥ कांस्यं मांसं मसूरञ्च चौद्रं चानृत-भाषणम् । पुनर्भोजनं मायासं दशम्यां परिवर्जयेत् ॥ पारण दिनाके निषिद्ध द्रव्याणि अद्यापि निषिद्धानि । एकादश्यां सभां पत्नां निराहारः समाहितः । स्नात्वा सम्यग् विधानेन धौतवासा जितेन्द्रियः । सम्पूज्य विधिवद् विष्णुं श्रद्धया सुसमाहितः । पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः ॥ उपहारैर्बहुविधैर्जपहोमप्रदक्षिणैः । स्तोत्रैर्नानाविधैर्नृत्य-गीतवाद्यैर्मनोरमैः ॥ एवं सम्पूज्य विधिवद् रात्रौ कुर्यात् प्रजागरम् ॥ चौद्रं मांसं सुरां तैलं व्यायामं क्रोधमैथुनम् । परान्नं काम्यतामन्यत् लोभं निर्माल्य-लङ्घनम् ॥ द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत् ॥ अपि च । वितथ-भाषणं, प्रवास, दिवा स्वप्न, अञ्जन, मसूरं, द्यूतं, हिंसा, वमनम्— इत्यादीन्यपि वर्जनीयानि ॥

शिवरात्रि—शिवचतुर्दशी । "माघ-मासस्य शेषे या प्रथमे फाल्गुनस्य च । कृष्णा चतुर्दशी सा तु शिव-रात्रिः प्रकीर्तिता ॥" तस्यामुपवासः प्रधानम् । "न स्नानेन न वस्त्रेण न धूपेन न चार्चया । तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासतः ॥" इति शङ्करोक्तेः ॥ "ततो रात्रौ प्रकर्तव्यं शिव-प्रीणन-तत्परैः । प्रहरे प्रहरे स्नानं पूजाञ्चैव विशेषतः ॥" "दुग्धेन प्रथमे स्नानं दध्ना चैव द्वितीयके । तृतीये च तथाऽऽज्येन चतुर्थे मधुना तथा ॥" "उपवास प्रभावेण बलादपि च जागरात् । शिव-रात्रे

ह्या तस्या लिङ्गस्यापि प्रपूजया। अक्षयान् लभते लोकान् शिवसायुज्य माप्नुयात् ॥" इति स्कान्दे ॥

उपवासो दिनेष्वेषु पवित्रे षु विधीयते ।
विष्णु-सन्निकटे वास उपवास इति स्मृतः ॥१०॥

तत्-सहायो निराहारः संयमादि-पुरःसरः ।
सोऽप्युक्त उपवासश्च पालनीयो विधानतः ॥११॥

उपवासः—[उप+वस्+घञ्] अहोरात्र-भोजनाभावः। उपवास-दिने वर्जनीयानि—अञ्जनम्। गन्धः। माल्यम्। अलङ्कारः। गात्राभ्यङ्गः। शिरोऽभ्यङ्गः। ताम्बूलम्। यथान्यत् बल-राग-कृत्। दिवा-स्वापः। अक्ष-क्रीडा। अष्टाङ्ग-मैथुनम् ॥ तत् पूर्वा-पर-दिने वर्जनीयानि—कांस्य-पात्रे भोजनम्। मांस-भोजनम्। सुरा-पानम्। मधु-पानम्। लोभः। वितथ-भाषणम्। व्यायामः। प्रवासः। दिवा-स्वापः। अञ्जनम्। मसूर-भक्षणम्। पुनर्भोजनम्। अध्व-गमनम्। यानम्। आयासः। द्यूत क्रीडा। अभ्यङ्गः। पराह्नम्। तैलम्। चणकम्। शाकम्। अधिक-इनम्। अल्पाम्बु-पानम् ॥ इति एकादशीतत्त्वम् ॥ "न भोक्तव्यं न भोक्तव्यं न भोक्तव्यञ्च नारद। सद्भिर्विप्रैर्महीपैश्च संप्राप्ते हरि-वासरे ॥ जन्माष्टमीदिने राम-नवमी-दिवसे हरेः। शिव-रात्रौ च यो भुङ्क्ते सोऽपि द्विगुणपातकी ॥" "उपवासासमर्थश्चेत् फल-मूल-जलं पिबेत्। नष्टे शरीरे स भवेदन्यदा आत्म-घातकः ॥

विशेषतः । एताः प्रशस्ता स्तिथयो भानुवार स्तथैव च ॥ अत्र स्नानं जपो होमो देवतानाञ्च पूजनम् । उपवास स्तथा दान मेकैकं पावनं स्मृतम् ॥ इति तिथि-तत्त्वे संवर्त-वचनम् ॥]

तीर्थ-यात्रां नरो गच्छेत् संयतो भक्ति-नम्र-धीः ।
तीर्थे कृत्यानि सर्वाणि कुर्यात् सम्यग् यथा-विधि ॥१३॥

तीर्थम्—पुण्य-स्थानादि ।

तीर्थ यात्रा—तीर्थ-गमनम् । यथा शरीरस्योद्देशाः केचित्-मेध्यतमाः स्मृताः । तथा पृथिव्यामुद्देशाः केचित् पुण्यतमाः स्मृताः ॥ प्रभावादद्भुताद् भूमेः सलिलस्य च तेजसा । परिग्रहान् मुनीनाञ्च तीर्थानां पुण्यता मता ॥ "तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत् ॥" कतिपयानि तीर्थानि यथा । (१) पुष्करं—ब्रह्मणः स्थानं, तीर्थराजेति नाम्ना ख्यातम् । (२) गङ्गा ("कलौ गङ्गां समाश्रयेत् ।") । (३) नर्मदा नदी । (४) दक्षिण-सिन्धुः । (५) प्रभासः । (६) द्वारवती । (७) समुद्र-सिन्धु-सङ्गमः । (८) कुमारिका । (९) केदारम् । (१०) बदरिकम् । (११) नैमिषारण्यम् । (१२) कुरुक्षेत्रम् । (१३) गङ्गा-द्वारम् । (१४) सप्त-गङ्गम् । (१५) प्रयागः । (१६) कनखलः । (१७) गङ्गोद्भेदः । (१८) सरस्वती । (१९) लौहित्यम् । (२०) करतोया । (२१) गङ्गा-सागर-सङ्गमः । (२२) वृन्दावनम् । (२३) मथुरा । (२४) काशी । (२५) काञ्ची । (२६) पुरुषोत्तम-

विशेषतः। एताः प्रशस्ता स्तिथयो भानुवार स्तथैव च॥ अत्र स्नानं जपो होमो देवतानाञ्च पूजनम्। उपवास स्तथा दान मेकैकं पावनं स्मृतम्॥ इति तिथि-तत्त्वे संवर्त-वचनम्॥]

तीर्थ-यात्रां नरो गच्छेत् संयतो भक्ति-नम्र-धीः।
तीर्थ-कृत्यानि सर्वाणि कुर्यात् शक्त्या यथा-विधि॥१३॥

तीर्थम्—पुण्य-स्थानादि।

तीर्थ-यात्रा—तीर्थ-गमनम्। यथा शरीरस्योद्देशाः केचिन्-मेध्यतमाः स्मृताः। तथा पृथिव्यामुद्देशाः केचित् पुण्यतमाः स्मृताः॥ प्रभावादद्भुताद् भूमेः सलिलस्य च तेजसा। परिग्रहान् मुनीनाञ्च तीर्थानां पुण्यता मता॥ "तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत्॥" कतिपयानि तीर्थानि यथा। (१) पुष्करं—ब्रह्मणः स्थानं, तीर्थ राजेति नाम्ना ख्यातम्। (२) गङ्गा ("कलौ गङ्गां समाश्रयेत्।")। (३) नर्मदा नदी। (४) दक्षिण-सिन्धुः। (५) प्रभासः। (६) द्वारावती। (७) समुद्र-सिन्धु-सङ्गमः। (८) कुमारिका। (९) केदारम्। (१०) वदरिकम्। (११) नैमिषारण्यम्। (१२) कुरुक्षेत्रम्। (१३) गङ्गा-द्वारम्। (१४) सप्त-गङ्गम्। (१५) प्रयागः। (१६) कनखलः। (१७) गङ्गोद्भेदः। (१८) सरस्वती। (१९) लौहित्यम्। (२०) कर-तोया। (२१) गङ्गा-सागर-सङ्गमः। (२२) वृन्दावनम्। (२३) मथुरा। (२४) काशी। (२५) काञ्ची। (२६) पुरुषोत्तम-

क्षेत्रम् । (२७) अयोध्या । (२८) गोदावरी । (२९) दण्डकारण्यम् । (३०) चित्रकूट-पर्वत ।

पुण्याय गम्यते यत्र तदेव तीर्थ मुच्यते ।
तीर्थे य कुरुते पाप न तीर्थ-फल मश्नुते ॥१४॥

["अश्रद्दधान पापात्मा नास्तिकोऽच्छिन्न-संशयः । हेतु-निष्ठश्च पञ्चैते न तीर्थ फल-भागिनः ॥" (अच्छिन्न-संशयः—फलोपायेतिकर्तव्यता सुनिश्चयशून्यः ।) इति प्रायश्चित्त-तत्त्वम् ॥]

यत्र जीव कृपा-विद्धो महायोगेन नियतः ।
महाभक्त्या शिवो भूत्वा शिवेन सह मोदते ॥१५॥
तदेव च पर तीर्थं विशुद्ध-हृदयाम्बरम् ।
सत्त्व-पूर्ण प्रभा-जुष्टम् आध्यात्मिकं सुपावनम् ॥१६॥

यत्र प्रेमणा महाशक्तिः शिवाभिन्ना स्वभावतः ।
विस्मृतात्मा महानृत्यं ताल-मान-रसाश्रिते ॥१७॥
तदेव परमं तीर्थं महाशून्यं चिदम्बरम् ।
रसाधार महानन्दं नित्य-पूर्णं शिवात्मकम् ॥१८॥

मानम्—यत्र तालं विश्रमति तत् । तच्चतुर्विधं यथा । (१) समम्, (२) विषमम्, (३) अतीतम्, (४) अनागतञ्च । इति सङ्गीत-शास्त्रम् ॥

चिन्मये परमे तीर्थे सुनिरर्थे नित्य-निर्मले ।
स्वरूपावस्थिति-स्थाने नित्य-धाम्नि परात्परे ॥१९॥

यथा वै यमुना पुण्या जाह्नवी मुपतिष्ठते ।
मुक्ति-काम स्तथा विद्वान् वैष्णवानुपतिष्ठते ॥२८॥

उपतिष्ठते—[उप+स्था (मिलने, मैत्रीकरणे, देव पूजायाम् ।)]

दर्शनं स्पर्शनं भक्त्या तेषा मुच्छिष्ट-भोजनम् ।
प्रणामः सेवनञ्चैव नाशयन्ति महाभयम् ॥ २९॥

उच्छिष्टम्—भुक्तावशिष्टम् । "तद् भुज्यते यद् द्विजभुक्त शेषम् ।"

शिरसा प्रणमेद् भक्त्या चोपहारं निवेदयेत् ।
रिक्त-हस्तो न पश्येत् तु गुरुं भक्तञ्च देवताम् ॥३०॥

सेवेत श्रद्धया भक्तान् दम्भ वर्जन पूर्वकम् ।
भक्तानां सेवनेनैव तोषयेद् भक्त वत्सलम् ॥३१॥

विनयेन प्रेम पूर्णेन मनसैव प्रयत्नतः ।
भक्तं नित्य मुपासीत सोपकार मपातकम् ॥३२॥

उपासीत—सेवेत ।

भक्तं यत्र मुपासीत तत् प्रीत्यर्थं मकुण्ठितः ।
निष्कामोऽगणयित्वा न लाभालाभौ विचारयन् ॥३३॥

विचारेण विना कार्यं कार्यमिदं यावद् भवेत् ।
सत् कार्येषु कर्तव्या निष्ठा सुविचारणा ॥३४॥

मध्याह्नः—समभीलामः।

कर्तव्यानि सदा कुर्यात् प्रणिधानेन यत्नतः।
न क्षुद्रमपि हेडेत सर्वं कुर्यान्मनोरमम् ॥२५॥
हेडेत—अवहेलेत।

आसनं वसनञ्चैव शयनं पादुका तथा।
अन्यस्य व्यवहारार्थं दद्यान्नैव कदाचन ॥२६॥

गृह-भूमिं गृहारामं गृहावग्रहणीं गृहम्।
तथा द्रव्याणि सर्वाणि रक्षेन्नित्यं सुनिर्मलम् ॥२७॥
गृह-भूमिः—वास्तु-भूमिः।
गृहारामः—गृह-समीपस्थ-कृत्रिम-वनम्। (उपवनम्)।
गृहावग्रहणी—[गृहम् अवगृह्यते अनया] देहली।
गृहम्—गृह्यते धर्माचरणाय। इष्टकाश्मादिरचितः गेहः।

द्रव्याणि सततं रक्षेद् यथा-स्थानं विचारतः।
नियमेन यथा-कालं कुर्यात् कर्माण्यतन्द्रितः ॥२८॥

उच्छृङ्खलो भवेन्नैव निरङ्कुशोऽनियन्त्रितः।
सदा संयम माश्रित्य कुर्यात् कर्म विधानतः ॥२९॥

यादृशो रोप्यते वृक्ष स्तादृशं प्राप्यते फलम्।
यथा कर्म फलावाप्ति स्तथैवेति सुनिश्चितम् ॥३०॥

जायन्ते च म्रियन्ते च शीतका जड बुद्धयः ।
उद्यमेनैव सिध्यन्ति धर्म-कामार्थ-मोक्षकाः ॥४१॥

शीतकः—अलसः । दीर्घ-सूत्री ।

षष्टमाभ्यासः ।

नृ-जन्म दुर्लभं प्राप्य नावहेलस्व मानव ।
कदापि मावजानीहि दानं मतम् परात्मनः ॥१॥

अवहेलस्व—अवहेडस्व । Disregard, neglect, slight.

अवजानीहि—अवज्ञां कुरु । Despise, treat with contempt, neglect

मोक्षाय प्रतिजानीथा मोक्षाय त्वं यतस्व च ।
जीवसि म्रियसे वा त्वं कारणीयं सिद्ध्यता ॥२॥

प्रतिजानीथा—प्रतिज्ञां कुरु । Promise, declare solemnly

कीर्त्यं च जीवितेनैव यदि नास्ति मे भयम् ।
कीर्त्यं च म्रियता मया यदि मोक्षो न लभ्यते ॥३॥

जज्ञिषे कोटि-शस्त्वं कोटि-शस्त्वश्च मम्रिय ।
कोटि-शस्त्वो भवारण्ये भ्रेमिथैव सुखं विना ॥४॥
जज्ञिषे—जातवान् ।

यावन्न विन्दसे मोक्षं भूयो भूयो जनिष्यसे ।
भूयो भूयो जरा-व्याधि-दुःखाद्यैश्च विधक्ष्यसे ॥५॥
विधक्ष्यसे—दग्धो भविष्यसि ।

दुःख-दग्धान् नरान् दृष्ट्वा पीड्यमानान् स्व-कर्मभिः ।
उत्तिष्ठस्व महामुक्तौ विलम्बस्व क्षणं न हि ॥६॥
उत्तिष्ठस्व—यतस्व ।

संसार-दाव-दाहेन दह्यमानो दिवा-निशम् ।
कथं विलम्बसे मुक्तौ विलम्बे तु भयं महत् ॥७॥
भीम-वक्त्रं करालास्यं दृष्ट्वा कालं वधोद्यतम् ।
कथं नो यतसे सद्यो विमोक्षाय सुखाय च ॥८॥
वधोद्यत—(वध+उद्यतः) पर-वधायोद्युक्तः ।

अधुनैव शुभं योगम् आरभस्व त्वरान्वितः ।
शीघ्रं सन्तर योगेन संसारं शोक-सङ्कुलम् ॥९॥

पाश-बद्धः पशुर्जीवः पाश-मुक्तः सदाशिवः ।
योगेन बन्धनं छित्त्वा पूर्णमेव शिवो भव ॥१०॥
पाशः—संसार-बन्धनम् । ["घृणा लज्जा भयं शोको जुगुप्सा

तामसस्य यदा धत्ते विषयस्याकृतिं मनः ।
तदैव वर्धते चित्ते निश्चयेन तमो-गुणः ॥१२॥

राजसस्य यदा धत्ते विषयस्याकृतिं मनः ।
तदैव वर्धते चित्ते निश्चयेन रजो-गुणः ॥१३॥

सात्त्विकस्य यदा धत्ते विषयस्याकृतिं मनः ।
तदैव सात्त्विको भावो वर्धते मानसे ध्रुवम् ॥१४॥

रज-स्तमोमयी वृत्तीः परित्यज्य प्रयत्नतः ।
साधकः सात्त्विकीं वृत्तिं वर्धयत्यवधानतः ॥१५॥

आचार-पालनेनैव, तीव्रेच्छायाः प्रभावतः ।
सर्व-सङ्ग-परित्यागाद्, दोष-त्यागाद्, विचारतः ॥१६॥
प्राणायामाद्, विरागाच्च, संकल्प कल्पना क्षयात् ।
भक्त्याधिक्या, जपाद्, ध्यानाद्, चित्तस्य सकलार्पणात् ॥१७॥
ज्ञानाभ्यासात्, समाधेश्च, सर्वत्र ब्रह्म-दर्शनात् ।
रजस्तमो लयं यातः सत्त्वं चित्ते नितिष्ठति ॥१८॥
नितिष्ठति—प्रतिष्ठितं भवति । [Is established]

[illegible] सत्त्व मयो योगी गुणातीतो भवेत् ततः ।
[illegible] ज्ञानात्मा सर्वोपाधि-विवर्जितः ॥१९॥
[illegible] सत्त्व मय [illegible] विशुद्ध सत्त्वस्य गुणा प्रमाद [illegible]

मूर्त्तिः परमा प्रशान्तिः। यांति सद्यः परमात्म निष्ठा, यद
सदानन्द तां सम्भवन्ति॥" इति विवेक चूड़ामणि॥

यतो हि त्रिगुणातीतो भवितुं बुद्धिमान् पुमान्।
राजसं तामसं हित्वा सात्त्वं संश्रयेदनिशम्॥२०॥

अनिशम्—सततम्।

सर्वं सद्गुण सम्पूर्णं शुद्ध सत्त्वमयं शुभम्।
इष्ट-देवं सदा जुष्ट ध्यायन्ति च सनातनम्॥२१॥

Cf "Holiest of Holy He, Think of Him, and holy b) Perfection"   जुष्टम्—सेवितम्।

देवस्य चिन्तनेनैव देवत्वं भवेत्ततः।
चिन्ताश्रयेण तद्रूप सदृशं भवति स्थिरम्॥२२॥

तदा चित्त भवेत् शुद्ध यथा देवः सुचिन्तितः।
शुद्धे चेतसि जायन्ते ज्ञान भक्ति समाधयः॥२३॥

सत्यं दानं तपो यज्ञ विवेक शुद्धि-कारणम्।
कुर्वन्ति मानवा नित्य धर्म शास्त्र परायणाः॥२४॥

सत्त्वो वै सर्व जीवानां जड चैतन्य-मिश्रितम्।
तमाधिक्ये जडाधिक्य सत्त्वाधिक्ये जडाल्पता॥२५॥

तमसो जड भागाद्धि मोहमयो जगद्-भ्रमः।
रजसो जड-भागाद्धि विषयाणां परिग्रहः॥२६॥

चित्तं पवित्रतां याति जडत्वेऽपगते सति ।
चित्तं निर्विषयं शुद्धं काम-विद्ध मशुद्धकम् ॥२७॥

वृत्ति हीनं निरालम्बं शान्तं निर्विषयं स्थिरम् ।
मनो रजस्तमो-हीनं शुद्ध मित्यभिधीयते ॥२८॥

अपवित्र-मना जीवो जाग्रदादि-दशा-त्रये ।
स्थूलादि-त्रि-शरीरेषु कर्तृतां भोक्तृतां गतः ॥२९॥
देश-काल-परिच्छिन्नः स्वल्प-ज्ञान-समन्वितः ।
कामार्तः स्वल्प-शक्तिश्च वर्तते दुःखितोऽस्थिरः ॥३०॥

दशा—अवस्था । जाग्रत्, स्वप्न, सुषुप्तिः ॥

शुद्धतां मनसि प्राप्ते जीव स्तुर्य-स्थितो भवेत् ।
महामायानुभावेन प्राप्य भागवतीं तनुम् ॥३१॥

भागवतीं तनुम्—अष्टादश-महादोष-विरहितां सर्व-सुलक्षण-युक्तां चिदानन्दमयीं तनुम् ।

तदा तत्र समाधिस्थो विज्ञानं लभते शुभम् ।
द्वैताद्वैत-स्वरूपस्य द्वैमदं धाम-ज्ञानिदम् ॥३२॥—
"शिवोऽहं, खल्विदं सर्वं बोधमय मसंशयम् ।
अहन्त्वेदं मयेदं हि मन्मदस्य सुनिश्चितम् ॥" ३३॥

'इदं'-भावं ततस्त्यक्त्वा 'शिवोऽहं' ध्यान तत्परः ।
निष्प्रपञ्चो भवेद् योगी ब्रह्म योग परायणः ॥३४॥

मनो योग प्रभावेण लब्ध्वा शुद्धतरं मनः ।
परमानन्द सम्पन्न सुपूर्णानन्दो भवेद्ध्रुवम् ॥३५॥

अहमस्मीति भावे च गतेऽहंते चिदात्मके ।
सर्वस्थितो भवत्येष समदर्शी रसाकुलः ॥३६॥

ततोऽपि निर्मलो भूत्वा निर्मलादपि निर्मलः ।
प्रशान्तो महामौनी चित्-स्वरूप स्वदा भवेत् ॥३७॥

ततः स जित्वरो योगी योगात्मगो निरामयः ।
शुद्ध-रूपः सदा-पूर्णो राजते परमः-शिवः ॥३८॥

जित्वरः—जेता ।

धन्यो धन्यः सदा धन्यो जीवन्मुक्तो मुनीश्वरः ।
धन्यो धन्यो महात्माऽयं स्वरूपावस्थितः परः ॥३९॥

जीवन्मुक्तः—जीवन्नेव मुक्तः । जीवन्नेवात्म-ज्ञानेन बन्ध-रहितः ॥ "जीवन्मुक्तो नाम स्व-स्वरूपाखण्ड-ब्रह्म-ज्ञानेन तद-ज्ञानबाध-द्वारा स्व-स्वरूपाखण्ड-ब्रह्मणि साक्षात्कृते अज्ञान-तत्-कार्य-सञ्चितकर्म-संशय-विपर्ययादीनामपि बाधितत्वाद् अखिल-बन्ध-रहितो ब्रह्म निष्ठः ॥"

सदा तस्य गुरुर्धन्यो धन्यं तस्य कुलं सदा ।
धन्या वसुन्धरा देवी तत्-पादाब्ज-पवित्रिता ॥४०॥

मध्याङ्कः—दगमोक्षाम ।

नाना रूपेण वेशेन नाना भावेन सर्वदा ।
जीवन्मुक्तो महातेजा विचरत्येव भूतले ॥८॥

धावमानां यथा भित्तु ज्योतिषां भास्करो यथा ।
तथा श्रेष्ठो मनुष्याणां जीवन्मुक्तो नरोत्तमः ॥९॥

कदापि स जडो भूत्वा सुनियन्तो विराजते ।
कदाचिद् वा चरत्येव नाना-कर्म-परायणः ॥१०॥

भवन्ति तस्य कर्माणि लोक-कल्याण-हेतवे ।
किञ्चनापि स योगी नो कुरुते स्वार्थ-काङ्क्षया ॥११॥

यथा स्पर्श-मणिं स्पृष्ट्वा लौहो भवति काञ्चनम् ।
निर्दोषः स भवत्येव प्राप्य निर्दोष मीश्वरम् ॥१२॥

दोष-हीने सदा-शान्ते निष्कामे ब्रह्म-रूपके ।
स्वार्थ-हीने मते मुक्ते कुकर्म नैव सम्भवेत् ॥१३॥

दिशि यस्या मुदेत्यर्कः सा पूर्वाशा, न संशयः ।
सत्-कर्म तत्र सन्देहो जीवन्मुक्तेन यत् कृतम् ॥१४॥
पूर्वाशा—पूर्व-दिक् ।

सर्व-बन्धन-पारे स स्व-स्वरूपे सदा-स्थितः ।
ज्ञान-नेत्र-युतो नित्यं सदैव प्रकृतेः परः ॥१५॥

मध्याह्नः—एकादशोंऽशः ।

दुःखेन लभ्यते दुःखं दुःखात् सौख्यं प्रजायते ।
दुःखं ददाति शान्तिञ्च निर्वाण-परमां शुभाम् ॥८॥

स्वल्पं परिमितं दुःखं योगाय भोग्यमेव यत् ।
आद्रियस्व सदा तद्धि भूमानन्द-प्रदायकम् ॥९॥

नाना-रूपं महद्दुःखं नाना-वेशं सुपावनम् ।
आवाहय शिवापत्यं श्रद्धान्वितः शिवान्वितम् ॥१०॥

आवाहय—आह्वय । शिवापत्यम्—शिवस्य अपत्यम् । शिवान्वितम् (दुःखम्) ।

'कृतार्थोऽनुगृहीतोऽस्मि' चेति सुस्वागतं वद ।
सन्तोषेण पवित्रेण पाद्यं तस्मै प्रकल्पय ॥११॥

श्रद्धा-भावासने शुद्धे सर्वदैवोपवेशय ।
यत्न पुष्पै स्तितिक्षाद्यै र्मन्त्रान्वितं प्रपूजय ॥१२॥

सर्वेषु शङ्करं ज्ञात्वा कारुण्य द्रव-चेतसम् ।
पश्य दुःखेऽपि शङ्करस्य प्रसन्नं मुख-पङ्कजम् ॥१३॥

शिवमानः सदात्मानं विश्वमूर्तिं मनामयम् ।
आमानस्येऽपि पश्य त्वं चिन्मयानन्द रूपिणम् ......

आमानस्यम्—दुःखम् । पीडा ।

सर्वाणि यानि दुःखानि प्रदातुं वसुधा क्षमा ।
उपाय तानि मन्यस्व शमूर्ते मम दर्शने ॥२१॥

मित्रोपनेत्र-योगेन द्रक्ष्यसि त्वं जगद् यदा ।
दुःखं दुःखाकृतिं हित्वा शिव-रूपं भविष्यति ॥२२॥

यदि देहादिकं सर्वं निवेदयसि विष्णवे ।
सन्न्यासेऽपि महादुःखे रोष स्त्वयि न शोभते ॥२३॥

त्वयाऽपलपितं विश्वं त्वया देह मुपेक्षितम् ।
दुःखात् पुनः कथं भीरो रोरुदसे न लज्जसे ॥२४॥

अपलपितम्—अस्वीकृतम् । Denied

असङ्गोऽसि निराकारो निर्विकारो निरञ्जन ।
गुणातीतः कथं नु त्वं दुःख-स्पृष्टो भविष्यसि ॥२५॥

दुःख-त्रासं परित्यज्य स्थैर्य-धैर्य-समन्वितः ।
सोढ्वा सर्व-विधं दुःखं नित्यं योगं समाचर ॥२६॥

द्वादशोल्लासः ।

योग-योग्यत्व-सिद्ध्यर्थं सर्वादौ मोक्ष-कामिणा ।
स-यमा नियमा नित्यम् उपसेव्याः प्रयत्नतः ॥१॥

"अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहा यमाः ।" "शौच
सन्तोष-तपः-स्वाध्यायेश्वर-प्रणिधानानि नियमाः ॥" इति पा
ञ्जले ॥ उपसेव्याः—[उप + सेव् (to practise)]

रजस्तमोमयाहारं धातु-साम्य-विनाशनम् ।
बीज-चय-करं खाद्यं जह्यात् सर्वं मनीषितः ॥२॥

धातुः—[धा + तुन्] शरीर-धारक-वस्तु । तद् यथा । (१)
कफः । (२) वातः । (३) पित्तम् ॥ "शरीर दूषणाद् दोषा
मलिनीकरणान्मलाः । धारणाद् धातव स्ते स्यु र्वात-पित्त कफा
स्त्रयः ॥"

धातु साम्य-विनाशनम्—"कषाय-कटुतिक्ताम्ल रूक्षाहारा
भोजनात् । चिन्ता व्यवाय-व्यायाम-भय-शोक प्रजागरात् ॥ ...
भयातिभाषाच्च कर्म योगातिकर्षणात् । वायु कुप्यति ...
जीर्णान्ते दिन संक्षये ॥ उष्णाम्ल लवण क्षार कटु ... भोज
नात् ... सन्ताप मद्य-क्रोध निषेवणात् ...
काले भुक्तस्य मध्याह्ने अर्धरात्रे । ... पित्त प्रकुप्यति
कुप्यति दिवस ... प्रकुपितं ...

नवान्न-पिच्छलानूपमांसाभिष्यन्दि-सेवनात्॥ चयमायाति दिवा-स्वप्न-शय्यासन-सुखादिभिः। कफः प्रदोषे भुक्ते च वसन्ते च प्रकुप्यति॥ दोषधातुमलाधारो देहिनां देह उच्यते। तेषां समत्वमारोग्यं क्षयवृद्धी विपर्ययः॥" इत्यादि गारुडे॥

बीज-क्षय-करम्—शुक्र-क्षय-करम्। शुक्र-क्षय-कर-द्रव्याणि यथा। (१) सार्षप-तैलम्। (२) पटोल-वास्तुक-काकमाची-पुनर्नवा-शाक-भिन्न सर्वशाकम्। (३) लवणाक्त-द्रव्यम्। (४) शुष्क-मरिचम्। (५) पिप्पली-शुण्ठी-भिन्न-कटुरसः। (६) अत्यम्लम्। (७) बहु-तिक्तकम्। (८) क्षारम्। इत्यादीनि॥ सामान्यतः स्वर्ण-सीसानां पात्रस्थं तोयं शुक्र-वृद्धि करम्॥ शुक्र-वर्धक-द्रव्याणि। यथा। (१) पानीयम्। (२) विशेषतः हैमन्तिकं जलम्। (३) चन्दनादि-द्रव्यानुलेपनम्। (४) रक्त-शालि-धान्यम्। (५) हैमन्तिक-षष्टिक-धान्यम्। (६) गोधूमः। (७) माषः। (८) कलम्बीशाकम्। (९) काकमाची-शाकम्। (१०) वार्ताकुः। (११) पक्वाम्रम्। (१२) दुग्धान्नम्। (१३) पक्व-तालम्। (१४) पक्व-कदलम्। (१५) चम्पक-कदलम्। (१६) द्राक्षा। (१७) खर्जूरम्। (१८) धात्री। (१९) कुष्माण्ड-मज्जा। (२०) मत्स्यः (विशेषतः रोहित-मत्स्य, मद्गुर-मत्स्य, चिङ्गट-मत्स्यः, हृष्ट-मत्स्यः)। (२१) मांसम्। (२२) हंस-बीजम्। (२३) समस्त-क्षीरम्। (२४) गो-दुग्धम्। (२५) माहिष-दधि। (२६) दधि-सरः। (२७) नवनीतम्। (२८) गव्य घृतम्। (२९) शर्करा-

मध्याङ्गः—द्वादशीस्नानम् ।

प्राणायामं जपं होमं ध्यानं दानञ्च पूजनम् ।
कीर्तनञ्च सदा कुर्यात् समुद्दिश्य नरायणम् ॥१०॥

नरायणः—नरा अयनमस्य । "नराणामयनं यस्मात् तेन नरायणः स्मृतः ॥" नारायणः ॥

नारायणं समाश्रित्य मोक्ष-मार्ग-परायणः ।
धापप्यानि सदा त्यक्त्वा योगं कुर्या दकातरः ॥११॥

प्रयोजनानुसारेण षट्-कर्माणि समाचरेत् ।
धौत्यादीनि मनुष्याणां देह-शुद्धिं प्रकुर्वते ॥१२॥

षट्-कर्म—"धौति र्वस्ति स्तथा नेति र्नौलिकी त्राटकस्तथा । कपालभातिश्चैतानि षट्कर्माणि समाचरेत् ॥" घेरण्ड-संहिता ॥

आसनानि विधानेन नियमेन समभ्यसेत् ।
आसनं हरते रोगं, कुरुते सुदृढां तनुम् ॥१३॥

आसनम्—(स्थितौ) आस्यतेऽनेन—देह-स्थैर्य-साधकः कर-चरणादिबन्धभेदरूपो योगाङ्ग-भेदः । पद्म-स्वस्तिकादि ॥

एकासन-दृढाभ्यासाद् देह-स्थैर्यं प्रजायते ।
देह-स्थैर्यं विना पुंसां मनः-स्थैर्यं न सम्भवेत् ॥१४॥

मुद्रां समभ्यसे न्नित्यं स्थैर्याय च विशेषतः ।
नाडीनां शोधनं कुर्याद् योग-तत्पर-मानसः ॥१५॥

मुद्रा—[मुद (हर्षे)+रक्] "महामुद्रा नभोमुद्रा उड्डीयानं

ठ

प्रसङ्गः—द्वादशोल्लासः ।

अधिरोहिणी—अधिरोहणश्रेणिका । काष्ठ वंशादि निर्मितम्
उच्च-स्थानारोहण साधनं सोपान-द्वन्द्वम् ॥

प्राणायामो रजं हन्ति हन्ति पापादिक तमम् ।
सर्वेन्द्रिय कृतान् दोषान् विनिहन्ति सुनिश्चितम् ॥१७॥
प्रददाति मनः स्थैर्यं ध्यानस्य देह-साधनम् ।
धारयेत समतां वा मरण-काले यथा-यथम् ॥१८॥

मधुभूमौ शुभे रम्ये कीटादि परिवर्जिते ।
भवने वेदिकां कुर्यात् स्थिरां दृढां सुशोभनाम् ॥१९॥

विस्तारे वेदिका कुर्य्या यावतो परिमाणतः ।
तदर्धं तु प्रकर्तव्यम् उच्चतायां प्रयत्नतः ॥२०॥

तथैव वेदिकां कृत्वा मात्युषां माति सौचिकाम् ।
गोमयादि प्रलिप्तां तां कुर्याद् विशुद्धि-हेतवे ॥२१॥

कम्बलाद्यासने तत्र चोपविश्य सुकोमले ।
पद्मं वा स्वस्तिकं किंवा सिद्धासनं समाचरेत् ॥२२॥

सम-काय-शिरो-ग्रीवो भूत्वा प्रसन्न-मानसः ।
प्राणायामं ततः कुर्यात् प्राङ्मुखो ह्यप्युदङ्मुखः ॥२३॥
वाम-नासिकया वायुं पूरयेच्च शनैः शनैः ।
प्रणवस्य चतुर्वार-जापेन सह साधकः ॥२४॥

अथवा सर्वदा ध्यायेत् परं बिन्दुं निराश्रयम् ।
किं वा निर्गुणं ब्रह्म हृदि सर्वं सनातनम् ॥३३॥

ध्यानोपाया ह्यसंख्येयाः सर्वदा सिद्धि कारिणः ।
असंख्यं यत्नतो ध्यानं सदा श्रेयस आचितम् ॥३४॥

अर्हन्ति ध्यानतो योगी जित-दोषो जितामय ।
ध्याना दहन्ति पापानि प्रजायन्ते समाधयः ॥३५॥

ध्यानं ददाति विज्ञानं ज्ञानं भक्तिं गतिं मतिम् ।
सदा शांतं स्वरानन्दं शक्तिं सिद्धिं श्रुतिं धृतिम् ॥३६॥

ध्यानेन दर्शनं पुंसा लभ्यात् सत्य सर्वात्मियम् ।
ध्यानेन भवनं सत्य देवानां पुण्य दर्शनम् ॥३७॥

ईशं ध्याता महायोगी ईशत्वाय प्रकल्पते ।
ब्रह्म ध्यानेन योगीन्द्रो गच्छति ब्रह्मणः पदम् ॥३८॥

यद् यद् ध्यायति चित्तेन सोऽत्रैव कोऽपि मानवः ।
तत् तदेव भवेत् तूर्णं स ध्रुवं ध्यान-योगतः ॥३९॥

विषयान् मानसं ध्यायन् याति वा यम-सादनम् ।
विश्वेशं मानवो ध्यायन् लभते गति मुत्तमाम् ॥४०॥

यतएव समाहृत्य सर्वेन्द्रियाणि सर्वतः ।
ध्यापयेद् यत्नतः ध्यानि ध्येयं विष्णुं पुनः पुनः ॥४१॥

सिद्धिं काञ्चन संप्राप्य तां प्रदर्शयितुं सदा ।
चेष्टते यो ध्रुवं तस्य योग-सिद्धि र्भवेन्न हि ॥५८॥

अन्विष्यति सुखं भोगं सिद्धिं शक्तिं यशः सदा ।
तस्य प्रेम-विहीनस्य योग सिद्धि र्भवेन्न हि ॥५९॥

अन्विष्यति—Seeks after

नान्यत्र सर्व सन्त्यागाद् योगः केनापि लभ्यते ।
कुसङ्गं वर्जयेद् दारां सर्व त्याग सुसिद्धये ॥६०॥

मित्रता नैव कर्तव्या मूढेन पापिना सह ।
असत् सङ्गो न कर्तव्यो दृष्ट्वा दूरतः त्यजेत् ॥६१॥

["मनस्थैर्यं परस्थैर्यं कामपरिक शान्तमनाम् । असत्यस्य असत्यस्मात् कर्मण्यस्याद् दुरात्मनाम् ।" इति पाद्मे क्रियायोगसारे ॥]

* बुद्धिश्च क्षीयते पुंसां नीचैः सह समागमात् । इति शान्तिपर्वणि ।

धर्म नैरन्तरिको यस्तु पापिनार्जति सम्पदम् ।
शास्त्रेण शूचते पापं न दृष्ट्वा दूरतः त्यजेत् ॥६२॥

धर्म नैरन्तरिक—[सत्य दयादिधर्मानौपाचरणं वा न स । नैन आचरति नैरन्तरिकः ।] पापकर्मणा धनमादाय आत्मनो धर्म बल प्रकाशनाय दान करो ।

प्रत्यक्ष कुर्वते पापं धर्म कर्म निर्भयः ।
दुर्बलानाम् दण्डो न यो पापिनं तं सदा त्यजेत् ॥६३॥

स्वं, पौत्रं, धर्म-कार्यञ्च पीडयित्वा सदैव यः ।
सञ्चिनोति धनं लोभात् तं कदर्यं सदा त्यजेत् ॥१४॥

कदर्यं विप्लवं मूढं निर्दयं व्यय-कातरम् ।
मूढ वित्त त्यजेन्मन्दं स्वार्थान्धं मानवं ध्रुवम् ॥१५॥
विप्लवः—कृपण ॥ मूढ़—कृपण । अधम, क्रूर । [पण्डः ।]
मन्द—मूर्ख । मद-रत । दम्भ । कृपण ।

अगम्यागामिनं मत्तं कामुकं स्त्री परायणम् ।
स्त्री जित मदाप कामुकं नराधमं सदा त्यजेत् ॥१६॥
अगम्या—धर्मेऽनुमाता नारी । "स्व स्त्री गम्या च सर्वेषा-
मिति वेद निरूपिता । अगम्या च तदन्या या इति वेद विदो
विदुः ॥" इति ब्रह्मवैवर्ते ॥

पठित्वा बहु-शास्त्राणि अवज्ञयेत कु-तार्किकाः ।
धर्मं न कुरुते किन्तु 'शिवोऽहं' भाषते भृशम् ॥१७॥
वञ्चकः कुरुते नित्यं स्वार्थाय पर-पीडनम् ।
देहासक्तं धनासक्तं तं दुष्टं दूरतः त्यजेत् ॥१८॥
कु-तार्किका—ॐ वादो नावलम्ब्य ॥ ॐ बाहुल्यावकाश-
त्वादनियतत्वात् ॥ ना: सू: ॥

कु-कार्ये निरतं धूर्तं हिंसकं बक धार्मिकम् ।
निन्दकं पाप-हर्त्तिस्यम् असत्-प्रतिपक्षे रतम् ॥१९॥

नास्तिकं दुर्जनं लुब्धं रक्षो-यक्षादि-सेविनम्।
कृतघ्नं कोपनं नित्यं त्यजेन्मिथ्या-परायणम् ॥७०॥

बक-धार्मिकः—"पाषण्डिनो विकर्मस्थान् वैडाल-व्रतिकान् शठान्। हैतुकान् बक-वृत्तींश्च वाङ्मात्रेणापि नार्चयेत्॥" इति विष्णुपुराणे॥ "अधोदृष्टि र्नैष्कृतिकः (=शठः, नीचः) स्वार्थ-साधन-तत्परः। शठो मिथ्या-विनीतश्च बक-व्रत-धरो द्विजः॥" इति दान-सागरे मनुः॥

असत्-प्रतिग्रहः—असतः निषिद्धस्य द्रव्यस्य (तिलादेः) असद्भ्यो वा नीचजनेभ्यः प्रतिग्रहः। निषिद्ध द्रव्य-प्रतिग्रहः। नीचजनेभ्यः प्रतिग्रहश्च॥

नास्तिकः—नास्ति परलोकस्तत् साधनमदृष्टं तत् साक्षीश्वरो वा इति मतिरस्य॥ यक्षादि-सेविनम्—"यक्षाणां यक्षिणीनाञ्च पैशाचीनाञ्च साधनम्। भूत-वेताल-गान्धर्वं मारणोच्चाटनानि च। अधोगमनमेतेषां साधने कीर्त्तितं हितम्॥" इति वाराही तन्त्रम्।

बहु वादी वृथा वादी वृथा रोषा दुरोदरः।
कर्णोपजीविनश्चैव यत्र विक्रयिण स्तथा ॥७१॥
परान्न लोलुपा नित्यं सदा सन्दिग्ध-मानसा।
मनश्चैव परिव्याप्याः संसारासक्त-मानसा ॥७२॥

दुरोदरः—द्यूतकृत्॥ यत्र विक्रयिणः—सन्तान-विक्रयिणः।

असारे गहने घोरे विध जन्तु-समाकुले।
आत्मानं सततं वर्द्धन् पापिनः पाप कारिण ॥७३॥

अध्यायः—त्रयोदशोऽध्यायः ।

ज्ञान-दीप प्रकाशेन यदा दृष्टं चराचरम् ।
तदा विनश्वरं सर्वं मायामयं विभासते ॥७॥
विषयाश्चाङ्गनाः सर्वं पलायन्ते समन्ततः ।
तदैव जायते चित्ते विचारोऽयं सुपावनः ॥८॥—

"केन कर्मेण बद्धोऽहं कुतो बन्ध समागतः ।
केनोपायेन मुक्तोऽहं संसार-कर्म-बन्धनात् ॥९॥
किं कार्यं किमकार्यं वा, तत्त्व को मे वदिष्यति ।
संसार-सागरे घोरे त्राता को मे भविष्यति ॥" १०॥

तदोत्कण्ठ-मना नित्यं निःसङ्गो रहसि स्थितः ।
एवं चिन्तयति प्राज्ञो धर्म-शास्त्रार्थ-कोविदः ॥११॥—

"अद्वितीयो महेशानो विश्वरूपी विराजते ।
विश्वात्मा विश्व-कर्ता स सदैवात्मनि मोदते ॥१२॥

नयनानि समस्तानि कृत्वा तैश्च स पश्यति ।
चरणानि समस्तानि कृत्वा तैश्च स गच्छति ॥१३॥
मानसानि समस्तानि कृत्वा तैश्च स मन्यते ।
शरीराणि समस्तानि कृत्वा तैश्च स दीव्यति ॥१४॥

दीव्यति—(दिव्—द्युतौ, क्रीडायाम्) Shines and plays.

एवं सति कथं कर्ता कथं भोक्ता भवाम्यहम् ।
कथं गर्वो मया-बन्धो मामेव संहनिष्यति ॥१५॥

कारके जीविते शम्भो किं कर्तव्यं मयाऽधुना।
सर्वदैव परेशस्य स्मरणं कीर्तनं विना ॥१६॥

दधाति शासनं यस्य सन्ततं भुवन-त्रयम्।
कथं सिंहासने तस्य स्थापयिष्येऽभिमानकम् ॥१७॥

वर्जयित्वा नदी-कान्तं नान्यं गच्छति जाह्नवी।
वर्जयित्वा सदात्मानं कुत्र जीवो गमिष्यति ॥१८॥

नदी-कान्तम्—समुद्रम् ॥ जाह्नवी—गङ्गा। ["जानु-द्वारा पुरा दत्ता जह्नुः संपीय कोपतः। तस्य कन्या स्वरूपा च जाह्नवी तेन कीर्तिता ॥" इति ब्रह्मवैवर्तं ॥]

शिव-स्मृतिः शिवं याति विषयो याति बन्धनम्।
कथं शिवं परित्यज्य संसेवे विषयानहम् ॥१९॥

सङ्ग-त्यागं विना ब्रह्म लप्स्ये न कदाचन।
विषयासङ्गितां कुर्वन् गमिष्यामि कथं शिवम् ॥२०॥

एकमेव पराणुञ्च समुपासे यदा मुदा।
नभं व्याप्ताननं भूत्वा पतते मां विमार्गगम् ॥२१॥

सन्तोषो विषये यावत् तावन्न ब्रह्म-दर्शनम्।
भूमानन्दं परित्यज्य स्वल्पानन्दे कथं रमे ॥२२॥

संसार-सागरे यस्य कृपाऽवलम्बनं मम।
कृपाऽमृतं शुभं यस्य मया पीतं पुनः पुनः ॥२३॥

विना यस्य कृपां नैव जीवानां मोक्ष-सम्भवः ।
कथं तं शङ्करं त्यक्त्वा भजेऽहं विषयं विषम् ॥२४॥

प्रत्येकस्य क्रिया-चिन्ते विघ्नं रचयतोऽखिलम् ।
परमार्थं परित्यज्य कथं स्वार्थं भजाम्यहम् ॥२५॥

चिन्ता या मृत्यु-कालीना भविष्यं रच्यते तया ।
अस्थिरं जीवनं प्राप्य विस्मरामि कथं शिवम् ॥२६॥

चिदानन्द-स्वरूपोऽहं, नाहं देहः कदाचन ।
कथं देह महं मत्वा यास्यामि काल-मन्दिरम् ॥२७॥

असङ्गोऽहं निराकारो निर्विकारो निरञ्जनः ।
क एव मम सम्बन्धो मायीय-जगता सह ॥२८॥

ब्रह्म सत्यं जगन्मिथ्या ब्रह्मैवाहं, न संशयः ।
सत्यं नित्यं परित्यज्य कथं मिथ्यामयं भजे ॥२९॥

भवाम्यहं यमाश्रित्य महीयान् वीर्यवान् सदा ।
यन्मुक्त्वाऽहं भविष्यामि दुर्बलादपि दुर्बलः ॥३०॥
भगवान् यो महाशम्भु मङ्गलैक-निकेतनः ।
कथं तं शङ्करं त्यक्त्वा मोहजं दुष्पदं भजे ॥३१॥

येनैव संनियम्यन्ते मनो-बुद्धीन्द्रियाणि च ।
यस्येच्छया जगत् सर्वं घूर्णमान महर्निशम् ॥३२॥

यस्मि साकाहुतिः पूर्णा यथार्थमेव पौरुषम् ।
विस्मृति यस्य देवस्य भवन्येवाक-घातनम् ॥४२॥
चिन्त्यमानः प्रियो यो मां मयत्येव सुधा-नदम् ।
निर्दोष तं महानन्दं त्यक्त्वा दुष्टं कथं भजे ॥४३॥

यस्मिन् लब्धे भवेल्लब्ध मिदं सर्व मभीप्सितम् ।
यस्मिन् माप्ते भवेत् मासम् ममरत्व मनामयम् ॥४४॥
यस्मिन् ज्ञाते भवेज् ज्ञातं विश्वं स्थावर-जङ्गमम् ।
दृप्ति-रूपञ्च तं हित्वा कथं दुःखमय भजे ॥४५॥

यस्मि मलभ्यमाने तु भव-बन्धो न छिन्यते ।
यस्मि म नभ्यमाने तु काम-ग्रन्थि नं भिद्यते ॥४६॥
यस्मि मलभ्यमाने च दुःखान्तो नैव गम्यते ।
ममृतं तं परित्यज्य कथं मृत्युमय भजे ॥४७॥

त्रैलोक्य-नमिता गङ्गा सर्वस्याकाङ्क्षिता परा ।
निकटस्था महोदारा सुलभा पुण्य-जीवना ॥४८॥—
तां तथापि त्यजत्येव सारङ्गो मेघ-जीवनः ।
पयोधरामृताभावे मृत्यु-ग्रस्तोऽपि तृष्णया ॥४९॥
एवं गते कथं हित्वा जगज्जीवन-कारणम् ।
याचे दुःखान्वितं क्षुद्रं भङ्गुरं पार्थिवं सुखम् ॥५०॥
एवं गते कथं नाहं भूत्वा ब्रह्मणि निष्ठितः ।
वर्जयामि महोत्साहः सर्व-सङ्गं सुदूरतः ॥५१॥

ट

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

"[illegible] [illegible], Touch

[illegible] [illegible] collection.

[illegible] ॥

[illegible] ॥

चतुर्दशाध्यायः ।

यत्र कुत्रापि चतुर्गत्यं भव-वैवर्तितं जगत् ।
यस्माद् भवतु यत् किञ्चित् याचे नाहं विचारणम् ॥१॥

दृष्ट मित्रं न याचामि काङ्क्षे परमं सुखम् ।
स्वरूपार्थमिति याचे मोक्ष कामो भवाम्यहम् ॥२॥

सामर्थ्यं जीवनं वित्तं विद्यां बुद्धिं मनो बलम् ।
सर्वं नियोजयिष्यामि केवलं साध्य-साधने ॥३॥

चतुरूनं समस्तान् चर्यास्यामीति-सादरम् ।
प्रतिपद्याम् समस्तांश्च पादेन दमयाम्यहम् ॥४॥

प्रतिपक्षः—शत्रु ।

विपक्षं केवलं कार्यो न मन्ति वैरिणो मम ।
विचरामि सदा मार्गं सर्वैनैवानुमोदितम् ॥५॥

पार्श्वार्थी न भवेत् कोऽपि नैव कोऽप्युपकारकः ।
यदि को स भवेद् योगे धर्म्ये पुण्ये सहायकः ॥६॥

Cf. "गुरु न स स्यात् स्वजनो न स स्यात् पिता न स स्याज्ज-
नी न सा स्यात् । दैवं न तत् स्या न पतिश्च स स्या न मोचयेद्
समुपेत-मृत्युम् ॥" श्रीभागवतम् ।

सर्वगं श्रीमहादेव विश्व-राजं परेश्वरम् ।
निकषाऽस्मि कु वेशेन, लज्जितोऽहं धिगस्तु माम् ॥१७॥

मूल समस्त पापानां ममारं वर्जयाम्यहम् ।
अधुनैव भविष्यामि निर्मलादपि निर्मलः ॥१८॥

भोगाना वासना त्यक्त्वा त्यक्त्वा च भेद-भावनाम् ।
अधुनैव भविष्यामि योगेन मुक्त मानस ॥" १९॥

भोग – सुखम् । स्त्रगादि भूतिः । इत्स्यमरादि कर्मकाणा
भूति ॥ कर्ता न देहो भोक्ता च आत्मा भोजयिता सदा ।
भोगी विभव भेदश्च निष्कलि मुक्तिरेव च ॥"

एवम् चिन्तनं कृत्वा युक्तिभिश्च पुनः पुनः ।
साधक स विवेकेन वैराग्य लभते दृढम् ॥२०॥

तत श्चाधिगता तेन तितिक्षा लोक दुर्लभा ।
आकाङ्क्षति परं योगं निर्वाण येन गम्यते ॥२१॥

सम्भाष्य —वसुंधरायै ।
सर्वं त्रिधा त्रिधा भूत्वा सम्भाति चरते त्रिधम् ।
त्रिधातौ च वै धीय शैक तत्त्वं निरञ्जनम् ॥१५॥

पद्मान्तरे पद ज्योति आकाशधातोविन्यसेत् ।
पद्मान्तरे पदं दिश सदा बोधि चेतना ॥१६॥
पद्मान्तरे पदं आत्म सम्पूर्णचित्त भोजन ।
पद्मान्तरे अमवादं पत्र-नीमाय कम्बुक ॥१७॥
पद्मान्तरे ममाहं अनलाभोक कायकम् ।
पद्मान्तरे सदाविष्णु कर्मबंध समन्वितम् ॥१८॥
पद्मान्तरे पदं ब्रह्म जन्म वर्षु जरा च्युम् ।
पद्मान्तरे पदं पूर्वं पतिनिर्वाण-दर्शनम् ॥१९॥
बहुकं—देह ।

देहोऽस्तिर्मिन भावं तु परिनिर्वाणं भवं शतं ।
ब्रह्माण्ड मिति भावन शुद्धे चित्ते प्रभावते ॥२०॥

चित्तायतनं जगत् सर्व मोह-दुःख निबेधनम् ।
चित्तं निर्वाणं तथा परमेशो भवान्यकम् ॥२१॥
निर्विमनम्—धामयः ।

न विद्यते सुखं दुःखं विषयेषु कदाचन ।
मन्दकं मौनर्य भूत्वा पुनः क्लेशाय जायते ॥२२॥

[illegible] ।
[illegible] ॥१०॥

[illegible] ।
[illegible] ॥११॥

[illegible] ।
[illegible] ॥१२॥
[illegible] ।

[illegible] ।
[illegible] ॥१३॥
[illegible] ।

[illegible] ।
[illegible] ॥१४॥

[illegible] ।
[illegible] ॥१५॥
[illegible] ।
[illegible] ॥१६॥

[illegible] ज्ञान-धर्म निकेतने ।
[illegible] मन्दिरे ॥१७॥

अपराधः ।

प्रथमोऽध्यायः ।

[illegible] निर्विकारः [illegible] ।
[illegible] परिवर्जयेत् ॥१॥

[illegible] ।
[illegible] परिवर्जयेत् ॥२॥

[illegible] परिवर्जयेत् ।
[illegible] ॥३॥
[illegible] ।
[illegible] परिवर्जयेत् ॥४॥

परिवर्जयेत्—परित्यजेत् ।

[illegible] वा [illegible] वा [illegible] वा नरः ।
[illegible] ॥५॥

[illegible] ।
[illegible] ॥६॥

अवाप्य—द्वितीयेनाथ [illegible]।

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ ६ ॥
[illegible]—[illegible] [illegible]। [illegible]।

द्वितीयाध्यायः।

[illegible] सर्वदा पूर्णं [illegible] [illegible] [illegible]।
[illegible] [illegible] [illegible] [illegible] ॥ १ ॥

[illegible] [illegible] [illegible] [illegible]।
[illegible] [illegible] [illegible] [illegible] त्रिगुणात्मिका ॥ २ ॥

त्रिगुणम्—सत्त्व रज तमांसि। सत्त्वम्—प्रकाशक ज्ञानं, सुख-हेतु। अस्य धर्माः—(१) प्रसादः। (२) हर्षः। (३) शान्तिः। (४) सन्तोषः। (५) धृतिः। (६) स्मृतिः॥ रजः—राग द्वेषात्मकं, दुःख हेतु। अस्य धर्माः—(१) कामः। (२) क्रोधः। (३) लोभः। (४) मानः। (५) दर्पश्च॥ तमः—आवरकं, मोह हेतुः। अस्य धर्माः—(१) प्रमादः। (२) मोहः। (३) भयम्। (४) भ्रान्तिः। (५) विषादः। (६) शोकः। (७) अरतिः। (८) पराधीनता। (९) आलस्यम्? (१०) तन्द्रा।

अत चेतनश्चांशीना आनन्दश्च प्रकाशितम् ।
तदेवं ब्रह्मणं प्राहुः जीवा नानाम रूपिणं ॥१२॥

मायया भिन्नितत्वाच्च चेतना जीवतां गता ।
कर्म-रूपं विशेषेण तदेव जीव उच्यते ॥१३॥
चेष्टोन्मुखतया यद्धि चित्त मित्यभिधीयते ।
निश्चय वृत्ति-रूपत्वात् तद् बुद्धि रिति गीयते ॥१४॥
संकल्प कल्पना वृत्ति-वशात् तत् कथितं मनः ।
अस्मिता-धारणेनैव तदहङ्कार उच्यते ॥१५॥

चैतन्यात् स्फुरति विश्व ज्ञान दृष्टा चिदात्मकम् ।
जीव-रूप चिदाभासः सर्वदैव चिदात्मकः ॥१६॥

अपां-नाथे यथा तोयं वीचि-रूपेण नृत्यति ।
ब्रह्म-सिन्धौ तथा चिद्धि जीव-रूपेण नृत्यति ॥१७॥
अपांनाथ—समुद्र । वीचि—तरङ्गः । स्वल्प-तरङ्गः ।

यावन्न लभते ज्ञानं तावदेव हि नर्त्तनम् ।
तावदेव सुखं दुःखं यातायातं पुनः पुनः ॥१८॥

पञ्च-भूत-मयं स्थूलं मांसास्थ्यादि-विनिर्मितम् ।
शरीरं सर्व-जीवानां नश्वरं भोग-मन्दिरम् ॥१९॥

अस्यायतं मिमं देहं आत्मा जानन्ति यत्नतः ।
किञ्चिज्जानन्ति विद्वांस स्तदप्यत्यन्त-दुःखतः ॥२०॥

[illegible] ।
[illegible] ॥१०॥

[illegible]
[illegible] ॥११॥

[illegible] ।
[illegible] ॥१२॥

[illegible] ।
[illegible] ॥१३॥

[illegible] ।
[illegible] ॥१४॥
[illegible] ॥

तृतीयोल्लासः ।

प्रकृत्या गुण-साम्याय [illegible] ।
सत्त्वं रजस्तमश्चेति त्रिगुणैः सर्वदान्वितम् ॥१॥

क्वचित् सत्त्वस्य बाहुल्यं क्वचिद् वा रजसस्तथा ।
क्वचिद् दृष्टं तमोऽधिक्यं गुणसाम्यं न विद्यते ॥२॥

प्रसक्तं परिवर्तन्ते देह-पिण्ड-पराणवः ।
केचिद् देहाद् बहि र्यान्ति देह मायान्ति केचन ॥३॥

प्रसक्तम्—नित्यम् ॥ आसक्तम् । अनुरक्तम् ॥

अलक्ष्येण गतायाताद् देहैकत्वञ्च मन्यते ।
कदाचिद् वस्तुतः क्वापि देहैकत्वं न वर्तते ॥४॥

एकदैव न गच्छन्ति बहिः सर्वे पराणवः ।
तस्मादेव हि सिध्यन्ति द्रव्यं कर्म गुण स्तथा ॥५॥

यथैव सन्निकर्षन्ति मद्यपा मद्यपं सदा ।
सदाचार-रता लोका यथा त्यजन्ति मद्यपम् ॥६॥
तथा साधोः शरीरे च सात्त्विकाः परमाणवः ।
आयान्ति सर्व-दिग्-देशाद् आकृष्टा स्तद्-गुणैः सदा ॥७॥
राजसा स्तामसाः सर्वे तथैव परमाणवः ।
साधो र्देहं परित्यज्य धावन्त्यसात्त्विकं प्रति ॥८॥

एवमेव नराणाञ्च चिन्ता-कर्म-प्रभावतः ।
उत्थानं पतनं नित्यं भवती नात्र संशयः ॥९॥

तीव्र-चेष्टा-प्रभावेण लभ्यते द्रुत सुमतिः ।
तीव्रया चिन्तया शीघ्रं कीटोऽपि भ्रमरायते ॥१०॥

समासाद्य सुरा-भाण्डं सात्त्विकी मानवी यथा ।
अनिच्छन्नपि दुर्गन्धं भुङ्क्ते पान्थ-जनैः सह ॥११॥

कलावतार—धर्मोद्धार ।

यथा दुर्जन-संसर्गात् पापं संजायते ध्रुवम् ।
तथा सज्जन संसर्गात् पुण्यं जायते निश्चितम् ॥१२॥

सत्-सङ्गं [illegible] सर्वदा सात्त्विकी भवेत् ।
निश्चयं तु सत्त्व-पालन [illegible] सादरं सदा ॥१३॥

अन्यायं पापं [illegible] हिंसा च दयाऽऽर्जवम् ।
[illegible] [illegible] दुःख [illegible] ॥१४॥
[illegible] [illegible] [illegible] [illegible]-दर्पादिभि युतम् ।
धीरेण [illegible] [illegible] [illegible] मन्दिरम् ॥१५॥

"प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च । तदा कृत-युगं विद्याद् ज्ञाने तपसि यद् रुचि ॥ यदा कर्मसु काम्येषु भक्ति र्यशसि देहिनाम् । तदा त्रेता रजोवृत्ति रिति जानीहि धीमन ॥ यदा लोभ स्त्वसन्तोषो मानो दम्भोऽथ मत्सरः । कर्मणाञ्चापि काम्यानां द्वापर तद् रज स्तमः ॥ यदा मदाऽनृतं तन्द्रा निद्रा हिंसादि-साधनम् । शोक-मोह-भयं दैन्यं स कलि स्तु तदा स्मृत ॥"

इडायां सोम-रूपेण वहत्येव समीरणः ।
पिङ्गलायां वहत्येव भानु-रूपेण मारुतः ॥७॥

"देहिनो दक्षिणे भागे पिङ्गला नाडिका स्मृता । पितृयोनि रिति ख्याता भानुस्तत्राधिदैवतम् ॥ दक्षिणेतरगा या च इडा सा नाडिका स्मृता । देवयोनि रिति ख्याता चन्द्र स्तत्राधिदैवतम् ॥" इति सौर-पुराणम् ॥

शक्ति-रूपो सुधाधारो देहमाप्याययत्यनिशम् ।
रौद्र-रूपो सहस्रांशु देह शोषयते भृशम् ॥

सुधाधारः—चन्द्र ।
आप्याययते—पोषयति । Strengthen, nourish

... सहस्रांशु—सूर्य ॥ भृशम्—अत्यन्तम

...मिमयी दीप्ता पापानां काल रूपिणी
स... रूपा सा संसेव्या वीत रागिणा ।

एवमेव
उत्थाम प... प्रभा सित-रक्ता तु पिङ्गला ।
... गम्या योग-गम्या सुलक्षणा ॥

तीव्र-चेष्टा-प्रभा...
तीव्रया विलय...
...नि कायते ।
समामाद्य सुरा... ...मृताशिनी ॥
अनित्यमपि ...

अपराह्णे—चतुर्थोऽभ्यासः ।

आधारं प्रथमं चक्रं शोणितं वर्णं चतुर्दलम् ।
लिङ्गाधश्च गुदोर्ध्वं च पद्म मिदं व्यवस्थितम् ॥१२॥

मूलं निर्वाण-मार्गस्य कुण्डल्याधारक तथा ।
मूलाधार इति प्रोक्तं चक्रमेतन्मनीषिभिः ॥१३॥

मूलम्—[मूल् (स्थितौ, प्रतिष्ठायाम्) + क] स्थापयति यत् । आदि-कारणम् । प्रधान-हेतु । उत्पत्ति-स्थानम् । आरम्भ-स्थानम् ।

लिङ्गे द्वितीयकं चक्रं स्वाधिष्ठानं मनोहरम् ।
षड्-दलं पङ्कजं दीप्तं सिन्दूर-वर्णं सुउज्ज्वलम् ॥१४॥

स्वाधिष्ठान मिदं पद्मं प्राण-स्थान मनाहतम् ।
हंस-स्थानं महाचक्रं विद्युन्नेवेव भास्वरम् ॥१५॥

नाभौ तृतीयकं चक्रं मणिपूरं मणि-प्रभम् ।
पद्मं दश-दलं स्वच्छं मिव नीलं समुज्ज्वलम् ॥१६॥

हृत्स्थं चतुर्थकं चक्रं द्वादशार मनाहतम् ।
शब्द ब्रह्ममयं पद्मं बन्धूक-कुसुमोपमम् ॥१७॥

पद्म मष्ट-दलं शुभ्रम् चनाहती व्यवस्थितम् ।
सर्व-काम-प्रदं नित्यं जीव-स्थानं शिवान्वितम् ॥१८॥

पञ्चमन्तु विशुद्धाख्यं चक्रं कण्ठे महाप्रभम् ।
मनो-विशुद्धिदं धूम्रं दल-षोडश-पङ्कजम् ॥१९॥

अपराह्न:—चतुर्थोल्लासः ।

सुषुम्णा-विवरस्थानि चक्राख्येतानि भावयेत् ।
गुर्वादेशानुसारेण संभेद्यानि यथा-क्रमम् ॥२६॥

एतदूर्ध्वं शिरो देशे सहस्रारं विराजितम् ।
ब्रह्म-धाम महापद्मं महारहस्य-मण्डितम् ॥२७॥

उद्यदादित्य-संकाशं श्वेत-वर्णं मधोमुखम् ।
महानन्दमयं पद्मं महामोक्ष-प्रदायकम् ॥२८॥

कर्णिकायां तदब्जस्य सोम-चक्रं सु-पावनम् ।
स्निग्ध-ज्योतिर्मयं पद्मं षोडशारं सुनिर्मलम् ॥२९॥

सोम-चक्रे निरालम्बं पुरं गुरुश्च मध्ड्ठलम् ।
पश्यत्यक्षरं योगी निर्वाण-भाव-संस्थितम् ॥३०॥

मध्ड्ठलम्—सुन्दरम् ।

निरालम्ब-पुरोर्ध्वेऽब्जं दल-द्वादश-संयुतम् ।
ज्ञानदं श्रीगुरु-स्थानं मणि-पीठादि-मण्डितम् ॥३१॥

तदूर्ध्वं तु सहस्रारे राजते चन्द्र-मण्डलम् ।
निर्मलं भास्वरं शुभ्रं परमाद्भुत-दर्शनम् ॥३२॥

चन्द्र-मण्डल-मध्यस्था परा शक्ति रमा कला ।
ऊर्ध्व-शक्ति-स्वरूपा सा नित्योदिता सुनिर्मला ॥३३॥

अपरार्द्धः—चतुर्थांशः ।

निर्वाणाख्य-कला-मध्ये निवोधिकोपरि स्थितः ।
पर-बिन्दु रिति ख्यातः शिवः शक्ति-समन्वितः ॥३७॥

पर-बिन्दौ तु या शक्ति निर्वाण-शक्ति रुच्यते ।
जीव-भूता जगन्माता महामाया चिदात्मिका ॥३८॥
सूर्य-कोटि-प्रभा-युक्ता शिवाभेद-मयी शिवा ।
प्रेम-धारां क्षरन्ती सा निर्वाण-दायिनी परा ॥३९॥

बिन्दु-मध्ये स्थितं शून्यं ब्रह्मणः पद मव्ययम् ।
शुद्धाद्वैत-स्वरूपञ्च योगि-गम्यं चिदात्मकम् ॥४०॥
निर्विकल्पं निरालम्बं निर्विकारं विनिष्क्रियम् ।
मुक्ति-रूपं परं-ब्रह्म निष्कलञ्च निरन्तरम् ॥४१॥
देश-काल-विहीनञ्च मायातीतं निरञ्जनम् ।
सत्य-रूपं सदानन्दं सदा-शमं सनातनम् ॥४२॥

इदं प्रोक्तं समासेन, ज्ञातव्यानि बहूनि तु ।
रहस्यानि सर्वाणि जानीयाद् गुरु-वक्त्रतः ॥४३॥

समासः—संक्षेप ।

अपराङ्—पञ्चमोल्लासः ।

दुरासदम्—दुर्जयम् । Unconquerable.

मूले—मूलाधारे ॥ पञ्जर—शरीरम् ॥

योगाग्निना यदा तप्ता योगिनोऽक्लिष्ट-कर्मणः ।
देवी सा भुजगाकारा प्रबोधं याति कुण्डली ॥७॥
प्राप्नोति च सहस्रारं महायोग-प्रभावतः ।
तदा योगी भवेन्मुक्तः सर्व-संसार-दोषतः ॥८॥
आत्मान मन्तरात्मानं ज्ञानात्मानं स पश्यति ।
तुर्यात्मानं विजानाति परमात्मान मव्ययम् ॥९॥
दिव्य-नेत्रः स जानाति तत्त्वानि प्रलयोदयौ ।
सर्व-दर्शी भवन्त्येव सर्वज्ञो भ्रम-वर्जितः ॥१०॥
सर्व-शक्ति-समापन्नः सर्वोपाधि विवर्जितः ।
ब्रह्म-रूपः प्रसन्नात्मा राजते मोदते सदा ॥११॥

आत्मा—जीवात्मा ॥ अन्तरात्मा—मनो-देवता । मनोऽवच्छिन्न-चैतन्यम् ॥ ज्ञानात्मा—बुद्धि-देवता । बुद्ध्यवच्छिन्न-चैतन्यम् ॥ तुर्यात्मा—तुर्य-दशाख्य-आत्मा ।

या शान्तिः मुक्त-चित्तानां यत् सुखं विदितात्मनाम् ।
नैव तस्य परांशं लभन्ते विषयैषिणः ॥१२॥

संसारासक्त-चित्ता ये माया-मोहित-मानसाः ।
भ्रमन्त्येव भवारण्ये शोक-दुःखेन कर्षिताः ॥१३॥

षष्ठोल्लासः ।

सर्व-शक्ति-स्वरूपञ्च सर्व-शक्ति-समन्वितम् ।
सर्व शक्तीश्वरं ब्रह्म पूर्णमेकं विराजितम् ॥१॥

तस्यैव प्राण-शक्त्या च धृतं विश्वं चराचरम् ।
तस्यैव प्राण-शक्त्या च धृतं जीव कलेवरम् ॥२॥

भूते भूते यथा ज्ञानं तारतम्येन लभ्यते ।
भूते भूते तथा शक्ति स्तारतम्येन दृश्यते ॥३॥

वशीकरोति यो योगी प्राण शक्तिं महाबलाम् ।
तस्य वै वर्धते शक्ति रन्तय बहिरेव च ॥४॥

इच्छा-शक्तिः क्रिया-शक्ति र्ज्ञान-शक्ति र्यथेतः ।
चिच्छक्तिय विवर्धन्त आनन्दश्च समन्ततः ॥५॥

शुभ-शक्ति-समावेशाद् अभयं याति सर्वतः ।
विशत्येव परं ब्रह्म चिदानन्द-निकेतनम् ॥६॥

इच्छा-शक्तिः—सर्वातिशायी शक्ति-विशेषः [यद् वा परस्य प्रमातुः सिसृक्षात्मा परामर्शः ।] [निखिल-शक्ति-गर्भिणी इच्छा-शक्तिः सर्वत्र परिपुर्णस्वात्मस्वरूपा ।]

क्रियाशक्तिः—विश्वाकार-वैचित्र्यधारित्व-योग्यता ।

ज्ञान-शक्तिः—आमर्शात्मता ।

आनन्दः—आनन्द-शक्तिः, आह्लाद-शक्तिः ।

सप्तमोल्लासः ।

स्पन्दनोऽयं चिते र्जीवो, जीवस्य मानसं रथः ।
मानसस्य रथः प्राणः, प्राणः स्पन्दमयो मतः ॥१॥

स्पन्दनः—रथः ।

तावद् भवति जीवस्य भ्रमणं मोह-कानने ।
यावन्न संक्षयं यान्ति स्पन्दनानि क्रमेणतः ॥२॥

प्राण-स्पन्द-निरोधेन कुम्भकेन यतात्मनाम् ।
कुण्डली वशतां याति राति मोक्षमनामयम् ॥३॥

प्राणो हि देहगो वायु रायामः कुम्भकः स्मृतः ।
प्राण-वायो र्जयः सम्यक् प्राणायामो निगद्यते ॥४॥ यदि

"पूरकं पूरणं वायोः, कुम्भकः स्थापनं क्वचित् ।
निःसारणं तस्य रेचकः परिकीर्तितः ॥"

सर्व-शक्तीश्वरी देवी कुण्डली चिन्मयी परा ।
आधारे वर्तते सूक्ष्मा सार्ध-त्रिवलयान्विता ॥५॥

"सच्चिदानन्द-विभवात् सकलात् परमेश्वरात् । आसीच्छक्ति स्ततो नादो नादाद् बिन्दु समुद्भवः ॥" "बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयो र्मिथः । समवायः समाख्यातः सर्वागम-

अपराह्णः—षष्टमोल्लास ।

संशयं भय मालस्यं दिवा-स्वप्नादिकञ्च यत् ।
विषमाशन-दोषञ्च भ्रान्तिञ्च विरतिं तथा ॥११॥
विचार्यैव प्रयत्नेन सन्ततं सन्त्यजेद् बुधः ।
प्राणायामं ततः कुर्यात् कुण्डल्या जागराय च ॥१२॥

षष्टमोल्लासः ।

कुम्भको द्विविधः प्रोक्तः सहितः केवल स्तथा ।
केवलस्य सुसिद्ध्यन्तम् धारयेत् सहितं पुमान् ॥१॥

सहितः—रेचक-पूरक-युक्तः (कुम्भकः) ॥ केवलः—रेचक-पूरक-विवर्जितः (कुम्भकः) । "केवल-कुम्भके सिद्धे त्रिषु लोकेषु न तस्य दुर्लभं भवति । केवल-कुम्भकात् कुण्डलिनी-बोधो जायते ॥" इति शाण्डिल्योपनिषत् ॥

सूर्य-भेदादिका नष्टान् कुम्भकांश्च समभ्यसेत् ।
बन्ध-त्रयं यथा-कालं प्रयत्नेन समाचरेत् ॥२॥

कुम्भकाः—"सूर्य-नाड्या समाकृष्य वायुमभ्यास-योगिना । विधिवत् कुम्भकं कृत्वा रेचयेत् शीत-रश्मिना ॥ उदरे बहु-रोगघ्नं क्रिमिदोषं निहन्ति च । मुहुर्मुहुरिदं कार्यं सूर्यभेद मुदाहृतम् ॥

…ध्यो हीन सुषुम्णायां प्राणस्तूड्डीयते यतः ॥ तस्मादुड्डीयनाख्यो-…यं योगिभिः समुदाहृत । उड्डीयानं तु सहजं गुरुणा कथितं सदा ॥ अभ्यसेत् तदतन्द्रस्तु वृद्धोऽपि तरुणो भवेत् । नाभे-रूर्ध्वं मधश्चापि त्राणं (तानम्—इति पाठान्तरम्) कुर्यात् प्रयत्नतः ॥ षाण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः । पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिध ॥ कण्ठ-संकोचरूपोऽसौ वायुमार्ग-निरोधकः । कण्ठ माकुञ्च्य हृदये स्थापयेद् दृढ मिच्छया ॥ बन्धो जालन्धराख्योऽय ममृताप्यायकारकः । अधस्तात् कुञ्चनेनाशु कण्ठसंकोचने कृते ॥ मध्ये पश्चिमतानेन स्यात् प्राणो ब्रह्म-नाडिगः । वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम् ॥ कुर्यादनन्तरं भस्त्रीं कुण्डली माशु बोधयेत् । भिद्यन्ते ग्रन्थयो वंशे तप्तलौहशलाकया ॥ तथैव पृष्ठवंशः स्याद् ग्रन्थिभेदस्तु वायुना ॥" इति योगकुण्डल्योपनिषत् ॥ "पूरकान्ते च कर्तव्यो बन्धो जालन्धराभिदः । कुम्भकान्ते रेचकादौ कर्तव्य स्तूड्डि-याणकः ॥ अधस्तात् कुञ्चनेनाशु कण्ठसंकोचने कृते । मध्ये पश्चिमतानेन स्यात् प्राणो ब्रह्मनाडिगः ॥" इति शाण्डिल्योप-निषत् ॥ ध्यानबिन्दूपनिषदपि द्रष्टव्या ॥

एवमभ्यसनेनैव प्राणायामाग्नि-योगतः ।
उत्तिष्ठति हृदाकाशे नागरूपा महोज्ज्वला ॥१॥

प्राण-स्पन्द-निरोधाय कुण्डल्या बोध-हेतवे ।
उपाया बहवः सन्ति गुर्वादिष्टं प्रपालयेत् ॥२॥

पद्मराट्—षष्टमोनाम ।

तत महाद्वारती-स्थानाद् द्विदलं प्राप्यते वरम् ।
आज्ञा-चक्रं परं तीर्थं योगि-गम्यं सुपावनम् ॥१२॥

तत्र सन्दृश्यते ज्योतिः भास्वरादपि भास्वरम् ।
पश्यत्यत्र प्रभा पुष्टं भगवन्तं महेश्वरम् ॥१३॥

यत्प्रसादाद् योगिन चित्तम् यत्रैव प्रविलीयते ।
यद्वैतं निर्मलं ज्ञानं सदा तेनात्र लभ्यते ॥१४॥

रुद्र-ग्रन्थिं दृढं भित्वा सार्धं जीवेन कुण्डली ।
सहस्रारं महापद्मं याति सा वायु-चालिता ॥१५॥

कुल-कुण्डलिनी देवी ब्रह्माण्डेन समं शिवा ।
निःशेषं विलयं याति शिवाज्ञे परमे-शिवे ॥१६॥

सहस्रारे यदा चित्तं योगिनः प्रविलीयते ।
स-रहस्य मिदं पद्मं ज्ञात्वा मुक्तो भवत्यसौ ॥१७॥

निरालम्बं पुरं प्राप्य दृष्ट्वेश्वरं निरञ्जनम् ।
शुद्ध-सत्त्व-मयो योगी दोष-हीनो भवत्यरम् ॥१८॥

शिवाब्ज-कर्णिका-मध्ये द्वादशारं महोत्पलम् ।
मुनिभिः शिवितं स्थानं पूर्णानन्द-रसाश्रयम् ॥१९॥
महोत्पलम्—पद्मम् ।

पश्यत्यत्र महायोगी मणि-पीठं महाप्रभम् ।
गुह्याद् गुह्यतमं रम्यं नाद-बिन्दु-समन्वितम् ॥२०॥

स्थानं ब्रह्म-ग्रन्थिश्च यो मतः। तन्मध्ये संस्थितः प्राणः प्राणाद् वह्नि-समुद्भवः॥ वह्नि-मारुत-संयोगान्नादः समुपजायते। न नादेन विना गीतं न नादेन विना स्वरः। न नादेन विना राग स्तस्मा-न्नादात्मकं जगत्॥ न नादेन विना ज्ञानं न नादेन विना शिवः। नाद-रूपं परं ज्योति र्नादरूपी परो हरिः॥ इति सङ्गीत-दामोदरः॥ अपि च। नादरूपा महेशानी चिद्रूपा परमा कला॥ नादादेव समुत्पन्नो अर्धं बिन्दु र्महेश्वरि। सार्धत्रितय बिन्दुभ्यो भुजङ्गी कुल-कुण्डली॥ इति कुब्जिका-तन्त्रे॥ "बिन्दुः शिवात्मक स्तत्र बीजं शक्त्यात्मकं स्मृतम्। तयो र्योगे भवेन्नाद स्तेभ्यो जाता स्त्रियस्तथा॥ इति क्रियासारः॥

अमा या षोडशी सौम्या कला कलङ्क-वर्जिता।
आप्लावयति योगीन्द्रं परमामृत-धारया॥२३॥

तत्त्व-ज्ञानं ततो लब्ध्वा निर्मलादपि निर्मलम्।
इष्ट-देवं मुदा पश्येत् सहस्रार्क-प्रभान्वितम्॥२४॥

इष्ट-देवे सदा दृष्टं ज्योति र्ब्रह्म निरामयम्।
इष्ट-देवे सदा दृष्टं सर्वं विश्वं चराचरम्॥२५॥
प्रत्येकं लोमकूपे तु विश्वानि लक्षकाणि च।
प्रति-विश्वे विराजन्ते ब्रह्म-विष्णु-शिवादयः॥२६॥
प्रति-विश्वे विराजन्ते भुवनानां चतुर्दश।
प्रत्येकं भुवने रम्ये शैलाश्च सागरा द्रुमाः॥२७॥

सुदृढ-ध्यान-योगेन पश्यति ज्ञान-चक्षुषा ।
गुणातीतं परं ब्रह्म सदेवामृत मव्ययम् ॥३७॥

पश्यन्त्येव बहिर्देशे तदेव निर्गुणं विभुम् ।—
यद् दृष्टं हि सहस्रारे हृदये तद् बहिश्च तत् ॥३८॥
तदेव वर्णितं सत्यं वेदानाञ्च चतुष्टये ।
तदेव गुरुणा स्पष्टम् अनुभूतं मुहुर्मुहुः ॥३९॥

सदा स गत-सन्देहो योग-निष्ठो धृतोद्यमः ।
पर-बिन्दु-स्थिते शून्ये समाधिं कुरुतेऽनिशम् ॥४०॥

शिवं दृष्ट्वा शिवं ज्ञात्वा भवत्येव शिव स्वदा ।
शिवोऽहं कुरुते नित्यं नान्यत् किञ्चित् स पश्यति ॥४१॥

सोऽहं-वृत्ति महं-वृत्तिं त्यक्त्वा प्रशान्त-मानसः ।
शून्यादूर्ध्वं महाशून्यं सुगम्भीरं स गच्छति ॥४२॥

वशीकृत-समाधिः स भवत्यानन्द-विग्रहः ।
चित्-स्वभावः सदा-पूर्णः स्वतन्त्रः परमेश्वरः ॥४३॥
अद्वितीयोऽपरिच्छिन्नो मायातीतः परात्परः ।
सर्वोपाधि-विनिर्मुक्तः प्रशान्तः परमः-शिवः ॥४४॥

कृत-कृत्य स्सदा भूत्वा जीवन्मुक्तः स केवलः ।
पूर्णं-ब्रह्म-स्वरूपेण स्वात्मन्येव विराजते ॥४५॥

पूर्ण-ज्योतिः।

पूर्ण-ब्रह्म-पदं नित्यम् एवं प्राप्नोति मानवः।
प्राणायाम-सहायेन ज्ञान-वैराग्य-मण्डितः ॥४६॥

प्राणायाम-बलेनैव समुत्थाप्योरगाङ्गनाम्।
ब्रह्म-रन्ध्रं समानीय कृत्वा समाधि मुत्तमम् ॥४७॥
प्रापयेद् ब्रह्म-मार्गेण मूलाधार मतः-परम्।
